# चतुर्थोऽध्यायः

## (१) श्रीमद्भागवते काव्यतत्त्वम्

श्रीमद्भागवते अनेकानि शास्त्राणि सन्निहितानि तथैव बहूनि विज्ञानतत्त्वानि बीजरूपेणोपदिष्टानि च । तदवदेव श्रीमद्भागवते काव्यतत्त्वानामपि वर्णनमनेकेषु स्थलेषु सम्प्राप्नोति । तद्यथा शब्दविषये, रसविषये, रीतिविषये, अलंकारविषये, छन्दविषये, गुणविषये चात्र सन्निवेशः इति तु न विमतिः ।

### (क) श्रीमद्भागवते काव्यतत्त्वानां निदर्शनम्

किं नाम काव्यतत्त्वम् ? इति पूर्वमेव विमर्शितम् तथाप्यत्र मुख्यतत्त्वानां निदर्शनमुपस्थाप्यते । श्रीमद्भागवते यत्र तत्र काव्यतत्त्वानां सन्दर्भाः प्राप्यन्ते । प्रथमस्कन्धतः द्वादशस्कन्धपर्यन्तं प्रचुरमात्रेण काव्यतत्त्वं सन्निहितं वर्तते, किन्तु सर्वाधिकरूपेण दशमस्कन्धे एव सम्प्राप्यते । स्कन्धोऽस्य ग्रन्थस्यात्मारूपेण स्वीक्रियते विद्वद्भिः ।

श्रीमद्भागवतमेतादृशो ग्रन्थो वर्तते यस्मिन् काव्यतत्त्वम्, ऐतिह्यम्, स्तोत्रम्, गीतादिकमनेकरूपविधानि तत्र परिलक्ष्यते । काव्यदृष्ट्या ग्रन्थेऽस्मिन् काव्यतत्त्वं, प्रबन्धकाव्यतत्त्वं गीतिकाव्यतत्त्वम्, चरितकाव्यतत्त्वादिरूपेण समाविष्टमिति ।

श्रीमद्भागवते काव्यानां विविधरूपाणि संदर्शितानि । गद्यात्मकम्, पद्यात्मकम्, उभयात्मकम्, उपदेशात्मकम्, गीतात्मकम्, आख्यानात्मकम्, स्तुत्यात्मकम्, लीलात्मकमित्यादीनि रूपाणि ग्रन्थेऽस्मिन् समुपलभ्यन्ते ।

अनेन कारणेन भागवताश्रितानि अनेकानि काव्यानि रचितानि परवर्तिभिः कविभिः ।

श्रीमद्भागवते गद्यात्मककाव्यस्योदाहरणानि अनेकेषु स्थलेषु न्यूनाधिकरूपेण प्रचुरमात्रेण पञ्चमस्कन्धे प्रस्फुटितानि सन्ति क्वचित् क्वचित् चतुर्थषष्ठद्वादशस्कन्धेष्वपि प्राप्तानि भवन्ति । गद्यकाव्यस्यापि अनेकाः भेदास्सन्ति । साहित्यदर्पणकारमतेन समासरहितगद्यं मुक्तकं इति नाम्ना व्यपदिश्यते । यथा– "आद्यं समासरहितम्"[१] समासविरहत्वेऽपि मुक्तककाव्यं भवति । श्रीमद्भागवतमहापुराणस्य पञ्चमस्कन्धे गद्यस्यास्योदाहरणं परिलक्ष्यते –

अथ ह तमुत्पत्त्यैवाभिव्यज्यमान भगवल्लक्षणं
साम्योपशमवैराग्यैश्वर्यमहाविभूतिभि–
रनुदिनमेधमानानुभावं प्रकृतयः प्रजा
ब्राह्मणा देवताश्चावनितलसमवनायातितरां जगृधुः ।[२]

तस्य हीन्द्रः स्पर्धमानो भगवान् वर्षे न ववर्ष
तदवधार्य भगवानृषभदेवो योगेश्वरः प्रहस्यात्म –
योगमायया स्ववर्षमजनाभं नामाभ्यवर्षत् ।[३]

येषां खलु महायोगी भरतो ज्येष्ठः श्रेष्ठगुण
आसीद्येनेदं वर्षं भारतमिति व्यपदिशन्ति ।[४]

पञ्चमस्कन्धे बाहुलरूपेण दीर्घसमासलघुसमाससहितं गद्यकाव्यस्य वर्णनं सम्प्राप्यते ।

आख्यानात्मककाव्यम्

---

1 साहित्यदर्पणे ६/३३१
2 श्रीमद्भागवते ५/४/१
3 श्रीमद्भागवते ५/४/३
4 श्रीमद्भागवते ५/४/९

मानवानां ज्ञानवर्धनाय, मनोरञ्जनाय, सुलभतया गूढातिगूढज्ञानसम्प्रेषणाय च आख्यानस्य आवश्यकता वर्तते । श्रीमद्भागवतस्य आख्यानेषु रूपकोपमानप्रतीकानां त्रिवेणी प्रवहति । आख्यानेषु काव्यरमणीयतया सह स्वानुभवमपि विविच्यते व्यासमहाभागैः ।

आख्याने पात्राणां संवादः कथानकस्य दृष्ट्या चारित्रिकस्य विश्लेषणम्, जीवनस्य भिन्नातिभिन्नानुभवमित्यादीनां सम्यक्तयात्र दृश्यं परिदृश्यते । ग्रन्थेऽस्मिन् प्रामुख्यत्वेन कानिचिदाख्यानि प्रसिद्धानि सन्ति, एष्वाख्यानेषु काव्यत्वं सम्प्राप्यते । यथा सती–आख्यानम् ध्रुवाख्यानम् पुरञ्जनोपाख्यानम् अम्बरीषाख्यानम् ययाति–आख्यानम् पूतनाख्यानम् कालियनागाख्यानम् सुदामाख्यानम् इत्यादीन्याख्यानानि अतीवप्रसिद्धानि सन्ति लोके ।

आचार्यभामहेन काव्यस्यावश्यकतत्त्वानां संख्या अष्टौ निर्धारिता कृता । यथा– शब्दछन्द–अभिधानार्थ–इतिहासाश्रितकथा–लोक–युक्ति–कलाश्च । यस्य कवेः कृतौ अष्टतत्त्वानि समाहितानि सन्ति तत्कृतिरुत्कृष्टा इति मन्यते ।

शब्दश्छन्दोभिधानार्था इतिहासाश्रयाः कथाः ।
लोको युक्तिः कलाश्चेति मन्तव्या काव्यगैर्ह्यमी ॥[१]

आचार्यविश्वनाथस्तु काव्यस्य शब्दार्थौ शरीरं, रसादिश्चात्मा, गुणाः शौर्यादिवत्, अलङ्काराः कटककुण्डलादिवत्, दोषाः काणत्वादिवत्, रीतयोऽवयव–संस्थानविशेषवत् स्वीकरोति ।

रसविषयकनिदर्शनम्–

---

[1] काव्यालङ्कारे १/९

श्रीमद्भागवते सर्वेषां काव्यतत्त्वानां रस–छन्दः–अलंकार–रीति–ध्वनि–गुणादीनां समावेशाः सन्ति । प्रथमेहि भागवते रसविषयकचर्चा संक्षेपरूपेणात्र क्रियते । नवरसानां चर्चा नहि अपितु एकादशरसानां वर्णनमस्मिन् ग्रन्थे समुपलभ्यते । शृंगारसात् भक्तिरसपर्यन्तम् श्रीमद्भागवते विप्रलम्भ–वियोगयोः शृंगाररसस्य वर्णनं सर्वातिशायि सम्प्राप्यते । श्रीकृष्णगोपिकानां प्रसंगे संयोगशृंगारस्याद्भुतवर्णनं दरीदृश्यते । पुरञ्जनोपाख्याने शृंगारस्य करुणस्य च वर्णनं लालित्यपूर्णं परिलक्ष्यते –

तामाह ललितं वीरः सव्रीडस्मित शोभनम् ।
स्निग्धेनापाङ्गपुङ्खेन स्पृष्टः प्रेमोद्भ्रमद्भ्रुवा ॥
का त्वं कञ्जपलाशाक्षि कस्यासी कुतः सति ।
इमामुपपुरीं भीरु किं चिकीर्षसि शंसमे ॥[१]

पुरञ्जनः पुरञ्जनीं दृष्ट्वा आसक्तिरतो भूत्वा तया सह वार्तालापं संलपति । पुरञ्जनः द्वयोः श्लोकयोः पुरञ्जन्यः परिचयं पृच्छति । अत्र शृंगाररसस्य वर्णनं सन्निहितम्।

छन्दविषयकनिदर्शनम्

प्रथमस्कन्धतः द्वादशस्कन्धपर्यन्तं विविधानि प्रकारकानि छन्दांसि प्रयुक्तानि । प्रथमेहि मङ्गलाचरणस्य श्लोके शार्दूलविक्रीडितछन्दसः प्रयुक्तं जातम् । यथा –

जन्माद्यस्य यतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ।

[1] श्रीमद्भागवते ४/२५/२५–२६

तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा

धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥[१]

सतीप्रसङ्गे तु भूतभावनाशुतोषशिवः यदा सतीमृत्युवृत्तान्तं श्रुत्वा तदा वीरभद्रं दक्षयज्ञविध्वंशनाय अप्रेषयत् । तदा सर्वे देवाः आगत्य विविधछन्दोभिः भगवतः शिवस्य स्तुतिं कृतवन्तः । एवंप्रकारेण अनेकेषु स्थलेषु विविधछन्दांसि प्रयुक्तानि जातानि । गायत्रीछन्दःप्रभृतयः अनुष्टुप्–इन्द्रवज्रा–उपेन्द्रवज्रा – प्रियंवदा– द्रुतविलम्बितादीनां छन्दसां प्रयोगाः संजाताः ।

अलङ्कारविषयकनिदर्शनम्

अलङ्काराणां निर्धारितायाः संख्यायाः विषये नैव कथयितुं शक्यते । विषयेऽस्मिन् सर्वेषां आचार्याणां मतैक्यं नास्ति । अलंकारः काव्यस्य सौन्दर्यवर्धकतत्त्वं वर्तते । श्रीमद्भागवते शब्दार्थलंकारोभयालंकाराश्च प्रयोगाः भावतत्त्वान् प्रकटनाय एवं सौन्दर्यचेतनानां उत्कृष्टताप्राप्तये क्रियते ।

पञ्चमस्कन्धस्य एकोनविंशतितमेऽध्याये अष्टमश्लोके अनुप्रासालंकारस्य वर्णनं वृत्यानुप्रासभेदरूपेण सह प्राप्यते –

सुरोऽसुरो वाप्यथ वानरो नरः

सर्वात्मना यः सुकृतज्ञमुत्तमम् ।

भजेत रामं मनुजाकृतिं हरिं

य उत्तराननयत्कोसलान्दिवमिति ॥[२]

---

[1] श्रीमद्भागवते १/१/१

[2] श्रीमद्भागवते ५/१९/८

अत्र सुरो सुरो, नरो नरः इत्यादिशब्दानां प्रयोगेण वृत्यानुप्रासालंकारः भवति । भागवतकारेण नामस्वनुप्रासालंकारस्य प्रयोगः अत्यन्तरमणीयः कृतोऽस्ति ।

रीतिविषयकनिदर्शनम्

आचार्यवामनः रीतेः जनकरूपेण मन्यते, विशिष्टपदरचनारीतिः इति स्वकीये ग्रन्थे अलिखत् । रीतीयं रसभावादेः उपकारकत्वमस्ति । साहित्यदर्पणकारेणोक्तं यत् – उपकर्त्री रसादीनाम् ।

श्रीमद्भागवते चतसृषु रीतिषु वैदर्भीलाटी–इत्यनयोः रीत्योः प्रयोगः दृष्टव्यः । वैदर्भीरीतिः माधुर्यव्यंजकवर्णैः सह समासरहिता लघुसमासयुक्ता वा भवति । यथोक्तम् समग्रगुणोपेतावैदर्भी[१] अस्याः उदाहरणं दशमस्कन्धे समुपलभ्यते । यथा –

तदोडुराजः ककुभः करैर्मुखं प्राच्या विलिम्पन्नरुणेन शन्तमैः ।
स चर्षणीनामुदगाच्छुचो मृजन् प्रियः प्रियाया इव दीर्घदर्शनः ॥[२]

अत्र समासोक्तिः अलङ्कारस्य सुकोमलवर्णेषु प्रयोगः नैव कृतः समासाभावत्वात् वैदर्भी रीतिः वर्तते । अनेकेषु स्थलेषु यत्र तत्र रीतीनामुदाहरणं प्रचुररूपेण नैव किन्तु क्वचित् अल्परूपेण सम्प्राप्यते ।

गुणविषयकनिदर्शनम्

शब्दार्थयोः यो धर्मः काव्यशोभां वर्धते स एव गुणः । काव्यगुणानां लक्षणं प्रथमे वामनेन प्रस्तुतं कृतम् ।

[1] काव्यालंकारसूत्रवृत्ति १/२/११
[2] श्रीमद्भागवते १०/२९/२

काव्यशोभायाः कर्तारो धर्माः गुणाः[१]

आचार्यवामनेन काव्यस्यात्मा रीतिः, रीतेरात्मा गुणः इति स्वीक्रियते । गुणानां संख्या दश वर्तते । सर्वे आचार्याः स्वस्वमतानुसारेण गुणानां संख्या पृथक्–पृथग्रूपेण स्वीक्रियन्ते ।

श्रीमद्भागवते सर्वेषां गुणानां प्रयोगः दृश्यते किन्तु माधुर्यगुणस्याधिक्यरूपेण सम्प्राप्यते । अयं गुणः संभोगात् करुणे, करुणात् विप्रलम्भे, विप्रलम्भात् शान्ते विपुलरूपेण अनुभूयते । अत्र माधुर्यगुणस्योदाहरणं प्रस्तूयते–

सत्यव्रतं सत्यपरं त्रिसत्यं
सत्यस्य योनिं निहितं च सत्ये ।
सत्यस्य सत्यमृतसत्यनेत्रं
सत्यात्मकं त्वां शरणं प्रपन्नाः ॥ [२]

पद्येऽस्मिन् टवर्गीयवर्णानाम् अभावाः लघुसमासान्ताः सानुस्वाराः च सन्ति । अत एव इदं पद्यं माधुर्यगुणसंयुक्तं वर्तते ।

अत्र सर्वेषां काव्यतत्त्वानां संङ्क्षेपरूपेण निदर्शनं प्रस्तुतं कृतम् । श्रीमद्भागवते सर्वेषां काव्यतत्त्वानां सन्निवेशः वर्तते । अत्र विशद्रूपेण शब्दार्थविषयकवर्णनम्, रसविषयकवर्णनम्, अलङ्कारविषयकवर्णनम्, छन्दविषयकवर्णनम्, गुणविषयकवर्णनमत्र प्रस्तूयते ।

---

[1] काव्यालंकारसूत्रवृत्ति ३/१/१

[2] श्रीमद्भागवते १०/२/२६

(ख) श्रीमद्भागवते शब्दार्थविषयकवर्णनम्

भगवत्कृता सृष्टिः द्विविधा दृश्यते एका प्राणरूपा द्वितीया निष्प्राणरूपा चेति । या आद्या वर्तते सैव नृकीटपतंगादयः । अस्यामेव अभिव्यक्तिस्वरूपभेदः अपि प्राप्यते । एकः स्फुटशब्दार्थरूपः द्वितीयः अस्फुटशब्दार्थरूपः । किन्तु प्राणिमन्तः ये भावाभिव्यक्तः कुर्वन्ति सः ध्वनिरूपेण उच्यते । अयमेव ध्वनिः ताल्वादिसंयोगेन शब्दरूपेण अभिव्यनक्ति । अस्य चर्चा अनेकेषु ग्रन्थेषु शास्त्रेषु पुराणेषु च प्राप्यते ।

शब्दो वै नित्यः, शब्दब्रह्मैव महर्षिव्यासेन स्वीकृतः । अस्य नैकानि उदाहरणानि प्राप्तानि भवन्ति । तद्यथा –

शब्दब्रह्म सुदुर्बोधं प्राणेन्द्रियमनोमयम् ।
अनन्तपारं गम्भीरं दुर्विगाह्यं समुद्रवत् ॥[1]

अत्र व्यासेन शब्दसन्दर्भाः निगदिताः । तेनोक्तं यत् शब्दब्रह्म सुदुर्बोधं भवति । यतोहि समुद्रवत् गम्भीरं अनन्तपारं प्राणेन्द्रियमनोमयञ्च शब्दब्रह्मदुर्विगाह्यमपि अस्तीति ।

अनेन ज्ञायते यत् शब्दस्यैव सत्ता अस्मिन् जगति शब्दं विना किमपि न सुकरमिति । शब्दे अर्थः समवायसम्बन्धेन सन्निहितः वर्तते । अनेन कारणेन महाकवि–तुलसीकालिदासादयः अपि स्वीकुर्वन्ति –

वर्णानामर्थसंघानां रसानां छन्दसामपि ।
मङ्गलानां च कर्तारौ वन्दे वाणी विनायकम् ॥[1]

---

[1] श्रीमद्भागवते ११/२१/३६

अपि च

वागार्थाविव सम्पृक्तौ वागार्था प्रतिपत्तये ।

जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥[२]

अयमेव शब्दः समष्टिरूपेण सर्वत्र व्यापृतः । शब्दैर्द्वारा काव्यसृष्टिरपि समुद्भूता । तत्र काव्यनिर्माणे यानि तत्त्वानि आवश्यकानि सन्ति तान्यपि श्रीमद्भागवते अनेकेषु स्थलेषु समासव्यासरूपेण दरीदृश्यते । अयमेव शब्दः वाक्यं महावाक्यं रसादिरलंकाररूपेण च परिवर्तते ।

अत्र श्रीमद्भागवते काव्यतत्त्वानां विमर्शसन्दर्भे पृथक् पृथग्रूपेण उपस्थाप्यते ।

(ग) श्रीमद्भागवते रसविषयकवर्णनम्

श्रीमद्भागवतस्य रसदृष्ट्या यदा आलोक्यते तदा अस्य पुराणस्य महत्त्वपूर्णस्थानं दरीदृश्यते । ग्रन्थेऽस्मिन् एकादशरसानां समावेशः वर्तते । भागवतकारेण वात्सल्यं रतिं च अत्यन्तं सजीवचित्रणं कृतमिति । रसभावयोजना दृष्ट्या अस्य महापुराणस्य कस्यापि महाकाव्यस्य नूनं न्यूनं स्थानं नास्ति इति । संस्कृतसाहित्यक्षेत्रे रसशब्दः विभिन्नेष्वर्थेषु प्रयुक्तो जातः । वेदवेदाङ्गब्राह्मणोपनिषद्–रामायणमहाभारतादिष्वस्य प्रयोगः जातः । यथा – रसे स्वादे जले वीर्ये शृङ्गारादौ विषे द्रवे । बले रागे धातौ तिक्तादौ पारदेऽपि च ।[३] आचार्यभरतेन रसनिष्पत्तिनिरूपणं नाट्यशास्त्रे सूत्रमाध्यमेन कृतमिति–

---

[1] रामचरितमानस १/१

[2] रघुवंशमहाकाव्ये १/१

[3] हेमकोषः

विभावानुभावसंचारीभावसंयोगाद्रसनिष्पत्तिः । अस्य सूत्रस्य संयोगात् निष्पत्तिश्च अनयोः शब्दयोः व्याख्या चतुर्भिः विद्वद्भिः स्वस्वमतानुसारेण कृतेति । भट्टलोल्लटमतेन 'संयोगात्' अस्यार्थः – उत्पाद्योत्पादकभावसम्बन्धात् तथा निष्पत्तेरर्थः उत्पत्तिः कृता । श्रीशंकुकमतेन गम्यगमकभावसम्बन्धात् तथा निष्पत्तेरर्थः अनुमितीति कृता । सांख्यमतानुयायीभट्टनायकेन "भोज्यभोजकत्वभावसम्बन्धात्" तथा निष्पत्तेरर्थः भुक्तिरिति । अभिव्यक्तिवादिना अभिनवगुप्ताचार्येण "व्यङ्ग्यव्यञ्जकभावसम्बन्धात्" तथा निष्पत्तेरर्थः अभिव्यक्तिरूपेण कृता । भरतमुनिमतानुसारेण यया सत्तया कायिकवाचिक्सात्त्विकाभिनयानां ज्ञानमुपजायते स एव विभावोऽस्ति ।

विभाव्यते येन वाङ्सत्त्वाभिनया इति विभावः ।[१]

आचार्यविश्वनाथानुसारेण संसारे रत्यादिभावानामुद्बोधकपदार्थैव काव्ये विभावः इति नाम्ना विज्ञायते । अस्य भेदद्वयं वर्तते –आलम्बनविभावः उद्दीपनविभाश्च । अनुभावः – येन प्रकारेण कारणानन्तरं कार्योत्पत्तिः संदृश्यते तथैव विभावानन्तरं अनुभावः जायते । दशरूपककारेण यथोक्तं यत् –

अनुभावो विकारस्तु भावसंसूचनात्मकः ।[२]

व्यभिचारिभावः–अस्थिरचित्तस्य वृत्तयः एव व्यभिचारिभावरूपेण अवज्ञायते । अयं भावः भिन्नभिन्नरसेषु तेषामनुकूलं भूत्वा विचरणं करोति अत एव अस्यापर नाम संचारिभावोऽपि कथ्यते –

विशेषादाभिमुख्येन चरणाद् व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च तद्विदाः ॥[३]

---

[1] नाट्यशास्त्रे ८

[2] दशरूपके ४/३

[3] साहित्यदर्पणे ३/१४०

रससंख्या – रससंख्याविषये आचार्या वैमत्यं भजन्ते । भरतमुनिमतानुसारेण अष्टौ रसाः स्मृताः । भरतमुनेरनन्तरं आचार्यदण्डी अपि अष्टौ रसाः स्वीकरोति । मम्मटाचार्येण शान्तोऽपि नवमो रसः इत्युक्त्या संलक्ष्य नव रसाः संदिष्टाः । आचार्यविश्वनाथः हृदयाकर्षकभावत्त्वाद् शान्तरसात् भिन्नं दशमरसरूपेण वत्सलरसं स्वीकरोति –

स्फुटं चमत्कारितया वत्सलो च रसं विदुः ।
स्थायी पुत्रलतास्नेहः पुत्राद्यालम्बनं मतम् ॥[१]

भक्तिमार्गस्य भक्तकविः भक्तिमपि एकादशमो रसः स्वीकरोति । अस्य मतस्य स्थापना साहित्यक्षेत्रे नास्ति परञ्च वैष्णवाचार्यैः अस्य स्वतन्त्ररूपेण प्रतिष्ठा अभिमन्यते ।

आचार्यविश्वनाथः रसस्य भेदान् आह–

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्सोऽद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः ॥[२]

एतेभ्यः रसेभ्यः स्थायिभावानामपि वर्णनं सञ्जातम् –

रतिहासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेत्थमषटौ प्रोक्ताः शमोऽपि च ॥[३]

विश्वनाथेन वत्सलरसमपि वर्णनं स्वग्रन्थे क्रियते –

स्फुटं चमत्कारितया वत्सलं च रसं विदुः ।
स्थायी वत्सलतास्नेहः, पुत्राद्यालम्बनं मतम् ॥

---

[1] साहित्यदर्पणे ३/२५१
[2] साहित्यदर्पणे ३/१८२
[3] साहित्यदर्पणे ३/१७५

उद्दीपनानि तच्चेष्टा विद्याशौर्यदयादयः ।

आलिङ्गनाङ्गसंस्पर्शशिरश्चुम्बनमीक्षणम् ।

पुलकानन्दबाष्पाद्या अनुभावाः प्रकीर्तिताः ॥

सञ्चारिणोऽनिष्टशङ्काहर्षगर्वादयो मताः ॥[१]

महर्षिव्यासेन श्रीमद्भागवतं रसस्य पराकाष्ठायाः गलितप्रायं शुकमुखादमृतात् संयुक्तरसस्यालयमिति कथ्यते । अत्र सर्वेषां रसानां निरूपणं वर्तते । प्रथमे हि शृङ्गाररसस्य वर्णनं क्रियतेऽत्र –

### श्रीमद्भागवते शृङ्गाररसस्य वर्णनम्

काव्यस्योद्देश्यं आनन्दप्रदानं करोति । आनन्दस्य भावना हृदि भावानां रूपाण्युत्पाद्यन्ते । मनुष्यस्य हृदि स्थितः भावरेवान्ततः परिपुष्टं भूत्वा रसे परिणतर्भवति । शृङ्गाररसमतः रसराजः इति कथ्यते । शृङ्गाररसस्य स्थायिका वः इति अर्थात् प्रेम विद्यते । रतिभावः हृदयस्य कोमलतमः ऋजुश्च संवेद्यभावः वर्तते । हृदयस्य समस्ताः भावनाः रसे समाविष्टाः भवन्ति । शृङ्गाररस्य द्वौ भेदौ वर्तेते विप्रलम्भः सम्भोगश्च । रतेरभिव्यञ्जकशृङ्गाररसस्य मानवस्य हृदयतन्तून् सर्वाधिकान् स्पन्दते । रतिः अथवा प्रेम मनुष्यस्य मूलभूत वृत्तिष्वग्रणी वर्तते । रतिरेवेयमीश्वरोन्मुखं भवति भक्तौ परिणतर्भवति । श्रीमद्भागवतस्य मूलोद्देश्यमपि मनुष्यस्य सम्पूर्णमनोवृत्तिः श्रीकृष्णस्य प्रेमाप्लावितं करोति । साहित्यदर्पणकारेण रसराजशृङ्गारं निम्नालिखितरूपेण व्याख्यायितः ।

[1] साहित्यदर्पणे ३/२५१–२५३

शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः ।
उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते ॥[1]

शृङ्गारस्यार्थरस्ति कार्यस्याविर्भावः तथा शृङ्गारस्याभिप्रायः तेन विद्यते यदित्थं कामोद्भावेन युक्तमस्ति । परकीया अनुरागशून्या वा वेश्यानायिकायाः अतिरिक्तान्याः नायिकाः तथा दक्षिणादिप्रकारस्य नायकः अस्यालम्बनं विभावोऽस्ति । शृङ्गारस्योद्दीपनं विभावमस्ति – चन्द्रचन्द्रिका, चन्द्रानुलेपनं, भ्रमरझङ्कारादि । प्रेमयुक्तः, भ्रुकुटीभङ्गः कटाक्षराद्यस्यानुभावाः सन्ति । उग्रता, मरणं, आलस्यं च जुगुप्सां विहाय अन्यानि सर्वाणि व्यभिचारिभावस्य पोषकमस्ति । स्थायिभावस्य रतिरस्थिता, स्थायिभावो रतिः, वर्णः श्यामोऽस्ति । तथा देवता विष्णुः अस्ति श्यामवर्णोऽयं विष्णुदैवतः ।

श्रीमद्भागवते शृङ्गाररसस्य सम्पूर्णभेदप्रभेदानां पूर्णनिदर्शनं प्राप्नोति । विप्रलम्भः शृङ्गारस्य प्रथमो भेदोऽस्ति । पूर्वरागः अस्यार्थः अस्ति एकः द्वितीयस्य वार्तायां श्रवणाद्दर्शनाच्च परस्परमनुरक्तः नायकनायिकयोः सा दशा या तस्य मेलनपूर्वमेवासीत् । श्रीमद्भागवतस्य दशमस्कन्धे वेणुगीतस्य प्रसङ्गमगच्छत् । श्रीकृष्णः ग्वालबालैस्सह वने गोचारणं कुर्वन् वंशीं अवादयत । ताञ्छ्रुत्वा गोपीनां हृदयेषु प्रेमभावस्य कृष्णेन सह मेलितुमिच्छायाः उदयमभवत् ताः गोप्यः एकान्ते परस्परपरोक्षरूपेण कृष्णस्य वर्णनं कार्षीचिषुः–

तद् व्रजस्त्रिय आश्रुत्य वेणुगीतं स्मरोदयम् ।
काश्चित् परोक्षं कृष्णस्य स्वसखीभ्योऽन्ववर्णयन् ॥[2]

---

[1] साहित्यदर्पणे ३/१८३
[2] श्रीमद्भागवते १०/२१/३

अत्र पूर्वरागात्मकः विप्रलम्भः शृङ्गारोऽस्ति । कृष्णगोपिकेऽत्रालम्बन–विभावोऽस्ति ।

सम्भोगशृङ्गाररसस्य वर्णनम्

शृङ्गारस्य द्वितीयं महत्त्वपूर्णपक्षमस्ति सम्भोगशृङ्गारः अपरनाम संयोगशृङ्गारः । संयोगः नायकस्याथवा नायिकायाः तस्याः चित्तवृत्तेः नाम अस्ति यस्मिन् तैः परस्परानुकूलं संभूय सुखानुभूयते । सहित्यदर्पणकारेण सम्भोगशृंङ्गारविषये निगद्यते यत् परस्परं प्रेम्णा युक्तः नायकनायिकादीनां सम्बन्धे स्पर्शदर्शनादेर्विषये वक्ता रसः सम्भोगशृङ्गाररिति कथ्यते ।

दर्शनस्पर्शनादीनि निषेवते बिलासिनौ ।
यत्रानुरक्तावन्योन्यं सम्भोगोऽयमुदाहृतः ॥[१]

चुम्बनमालिङ्गनादि भोगानामनन्तरूपायाः कारणं सम्भोगशृङ्गारस्य भेदप्रभेदानां गणनामप्यसम्भवमस्ति विद्वांसः सम्भोगशृङ्गारमेव मन्यते । सम्भोगशृङ्गारस्योद्दीपनं विभावेषु षड्ऋतवः चन्द्रसूर्यश्चोदयं भवतः सूर्यचन्द्रश्च बालक्रीडा, वनविहारः प्रभातकालः, मधुपानं, रात्रिक्रीडा, आभूषणादियोग्यपदार्थानां परिगणनं क्रियते –

तत्र स्याद्दतुषट्कं चन्द्रादित्यौ तथोदयास्तमयः ।
जलकेलिवनविहारप्रभातमधुपानयामिनीप्रभृतिः ॥[२]

श्रीमद्भागवते सम्भोगशृङ्गारस्य दिव्यता अनेकेषु स्थलेषु सम्प्राप्यते । गोपीभिः हेमन्तर्तोः प्रारम्भे कात्यायनीदेव्याः व्रतमाचरन्ते । श्रीकृष्णं पतिरूपं प्राप्तुं

---

[1] साहित्यदर्पणे ३/२१०

[2] साहित्यदर्पणे ३/२१२

कामनया व्रतं कुर्वन्ति । भगवता कृष्णेन इमाः गोपिकाः मनोभिलषितकामनां महारासद्वारा परिपूर्णं कृतमासीत् । रासलीलायाः प्रारम्भस्य प्रसङ्गः चन्द्रादि– उद्दीपानां अतिरमणीयवर्णनेन सह भवति । शरदृतौ महारात्रौ ऋतोरनुकूलानि पुष्पाणि सुशोभितानि सुगन्धप्रसारतानि च ।

रात्रिः शरदोत्फुल्लमल्लिकाः

श्रीकृष्णस्य वंशीध्वनिं श्रुत्वा सर्वाः गोपिकाः एकस्थले आगच्छन्ति स्वप्रियतमेन मेलितुं व्रजन्ति –

निशम्य गीतं तदनङ्गवर्धनं व्रजस्त्रियः कृष्णग्रहीतमानसाः ।
आजग्मुरन्योन्यमलक्षितोद्यमाः स यत्र कान्तो जवलोलकुण्डलाः ॥[१]

श्रीकृष्णः यमुनाजलस्य तरलतरङ्गानां स्पर्शकारणात् शीतलवायुः तथा कुमुदानां सुगन्धेन सुरभितवायुवन्तः पुलिनतटे गोपिकाभिः सह क्रीडां चिक्रीड –

बाहुप्रसारपरिरम्भकरालकोरुनीवीस्तनालभननर्मनखाग्रपातैः ।
क्ष्वेल्यावलोकहसितैर्व्रजसुन्दरीणामुत्तम्भयन् रतिपतिं रमयाञ्चकार ॥[२]

प्रस्तुतेऽस्मिन् श्लोके नायकस्य हस्तप्रसारणं आलिङ्गनकरणम्, विनोदकरणम्, हसनम्, विनोदपूणदृष्टिः पातनादयः सम्भोगशृङ्गारस्य रसानुकूलानुभावानां चित्रणमभवत् । यैः सहृदयसामाजिकयोः हृदयेषु परमोज्ज्वलकामभावस्य स्थायिभावो रतिः प्रदीप्तमुपतिष्ठति । हर्षगर्वादयः व्यभिचारीभावास्सन्ति । अत एवास्मिन् प्रसङ्गे सम्भोगशृङ्गारस्य मनोहरवर्णनम् अभवत् ।

---

[1] श्रीमद्भागवते १०/२९/४

[2] श्रीमद्भागवते १०/२९/४६

महारासस्य प्रसङ्गे अनेकेषु स्थलेषु अस्य सम्भोगशृङ्गारस्य वर्णनं समुपलभ्यते । कृष्णगोपिकयोर्मध्ये यस्याः लीलायाः वर्णनं जातम् तत्र तु अस्य वर्णनं बहुमात्रेण समुपलब्धम् । कृष्णस्य स्पर्शं सम्प्राप्य गोपिकाः आनन्दमग्नाः सञ्जाताः –

कृष्णाभिमर्शमुदिता यद्गीतेनेदमावृतम् ॥[1]

काचिद्गोपी नृत्यं कुर्वती श्रान्ता भवति तर्हि श्यामसुन्दरकृष्णस्य स्कन्धोपरि अतिष्ठन् । काचिद्गोपी पुलकितं भूत्वा कृष्णस्य हस्तं चुचुम्ब –

चन्दनालिप्तामाघ्राय हृष्टरोमा चुचुम्ब ह ॥[2]

एका गोपी भगवतः कृष्णस्य कपोलेन सह स्वकपोलं स्पर्शयति । कृष्णः स्वचर्विततताम्बूलं तस्यै ददाति । अन्याभिः गोपिकाभिः श्यामसुन्दरस्य करकमलौ स्वेषु स्वेषु स्तनेषु निधायितौ –

पार्श्वस्थाच्युतहस्ताब्जं श्रान्ताधात् स्तनयोः शिवम् ॥[3]

गोपीनां मुखेषु स्वेदानां विन्दवः दीव्यन्ति । श्रीकृष्णोऽपि गोपिकाः स्वहृदयेनालिङ्गनं करोति, कदा हस्तेन गोपिकाः स्पर्शयति, कदा प्रेमपूर्णकटाक्षेण ताः पश्यति । कदा लीलयोन्मुक्तहासं हसति ।

एवंप्रकारेण तेन गोपिकाभिः सह विहरति स्म । भगवतः कृष्णस्य हस्ताब्जेन नखस्पर्शेण च गोपिकाभ्यः महदानन्दः सम्प्राप्तः –

पुण्यानि तत्कररुहस्पर्शप्रमोदाः ।[4]

---

1 श्रीमद्भागवते १०/३३/९
2 श्रीमद्भागवते १०/३३/१२
3 श्रीमद्भागवते १०/३३/१४
4 श्रीमद्भागवते १०/३३/२२

अत्र समग्राध्याये संयोगशृङ्गारस्य वर्णनं मनोहारि निदर्शनं जातम् । गोपिकानां मधुराचेष्टा यथा– भ्रुवौ इतस्ततः करणं, नृत्यकरणम्, कटिबन्धनर्तकम्, गीतगानमित्यादयः अनुभावानां, हर्षोन्मादश्रमादयः व्यभिचारिभावानां तथा स्वेद–रोमाञ्चादिसात्विकभावैः नायकादिगतरतीनाम् स्थायिभावस्य पुणरूपेण प्रतीतिरुपजायते । अनेन शृङ्गाररसस्यालौकिकपुष्टिः स्वाभाविकी एवास्ति ।

श्रीमद्भागवते हास्यरसस्य वर्णनम्

"सुखाय कर्माणि करोति लोके"[१] श्रीमद्भागवतस्य प्रसिद्धेयं सूक्तिः प्रत्येकमनुष्यः सुखाय प्रसन्नतायै च कर्म करोति मार्गमपि च अन्वेषयति । विविधप्रकारेण मनुष्याः हासपरिहासस्योपायमन्वेष्यन्ति । येन केन प्रकारेण मुखपटले स्मितानां कृते प्रयतन्ते । शिशूनां चेष्टाः दृष्ट्वा हास्यं करोति कोऽपि अट्टहासं च करोति । साहित्यदर्पणकारेण हास्यरसस्य लक्षणं प्रस्तुतं कृतम् –

विकृताकारवाग्वेषचेष्टादेः कुहकाद्भवेत् ।
हास्यो हासस्थायिभावः श्वेतः प्रमथदैवतः ॥
विकृताकारवाक्चेष्टं यमालोक्य हसेज्जनः ।
तमत्रालम्बनं प्राहुस्तच्चेष्टोद्दीपनं मतम् ॥
अनुभावोऽक्षिसङ्कोचवदनस्मेरतादयः ।
निद्रालस्यावहित्थाद्या अत्र स्युर्व्यभिचारिणः ॥[२]

हासस्थायिभावस्य अभिव्यञ्जकरसः हास्यं कथ्यते । अस्योत्त्पत्तिः आकारः, वाणी, वेशः, हस्तादिभंगी – इत्यादीनां वर्णनेन सह भवति । अस्य

[1] श्रीमद्भागवते ३/५/२

[2] साहित्यदर्पणे ३/२१४–२१६

शुभ्रवर्णोऽस्ति, देवता प्रमथगणाः सन्ति । आलम्बनं सः जनोऽस्ति यस्य आकारादिषु विकृति दृश्यमान् भवति यं दृष्ट्वा जनाः हसन्ति । तस्य व्यक्तेः चेष्टाः उद्दीपनं तथा नेत्राणां सङ्कोचः मुखविकासादयः अनुभावोऽस्ति । निद्रा, आलस्यं, अवहित्थादयः अस्य रसस्य व्यभिचारीभावोऽस्ति । उत्तममध्यमाधमश्रेण्याः पात्राणां भेदद्वयं मिलित्वा अस्य रसस्य षड्भेदाः भवन्ति ।

श्रीमद्भागवते हास्यरसस्य मनोहरवर्णनं विशेषरूपेण बालकृष्णस्य लीलाप्रसङ्गे सम्प्राप्यते । अत्रोदाहरणं प्रस्तूयते –

यर्ह्यङ्गनादर्शनीयकुमारलीला–

वन्तर्व्रजे तदबलाः प्रगृहीतपुच्छैः।

वत्सैरितस्तत उभावनुकृष्यमाणौ

प्रेक्षन्त्य उज्झितगृहा जहृषुर्हसन्त्यः ॥[१]

यदा बलरामकृष्णौ कुमारावस्थां प्राप्तवन्तौ तदा व्रजे अनेकलीलाः कृतवन्तौ । ताः लीलाः दृष्ट्वा गोपिकाः स्तब्धाः जाताः । कृष्णवलरामौ गोवत्सानां पुच्छं संकर्षयतः, यदा वत्साः धावन्ति तदा तौ अनुधावतः । गोपिकाः गृहकार्यं परित्यज्य अनयोः भ्रात्रोः पश्यन्ति स्म । प्रस्तुतेऽस्मिन् पद्ये कृष्णवलरामयोः चञ्चलचपलमनमोहकानां बाललीलानां हास्यरसपूर्णवर्णनं समजायत । अत्र द्वौ भ्रातरौ हास्यरसस्यालम्बनमस्ति । वत्सानां पुच्छसमकर्षणादीनां चेष्टाः उद्दीपनमस्ति, गोपिकानां प्रहसनमनुभावोऽस्ति । अनेन प्रकारेणात्र विभावानुभावादीनां सम्यग्संयोजनेन हास्यरसस्याभिव्यक्तिरजायत ।

---

[1] श्रीमद्भागवते १०/८/२४

श्रीमद्भागवते करुणरसस्य वर्णनम्

करुणा मनुष्याणां स्वभावानां मूलभूतभावेषु एवास्ति । मनुष्यः यदा प्रसन्नं भवति तदा हसति यदा दुःखी भवति तदाश्रुः प्रवाहयति इयं मानवस्य सहजप्रवृतिरस्ति । अतः आचार्यः करुणरसं उच्चस्थानं प्रददाति । महाकविभवभूतिस्तु करुणमेव सर्वरससारस्वरूपं मन्यते –

एको रसः करुण एव निमित्तभेदाद –
भिन्नः पृथक् पृथगिवाश्रयते विवर्तान् ।
आवर्त्तुवुद्बुद्तरङ्गमयान् विकारा–
नम्भो यथा सलिलमेव तु तत्समग्रम् ॥[१]

करुणरसे सामाजिकहृदयानां संवेदनकर्तुं सहजगुणोऽस्ति । काव्यरसस्वादकुर्वन् समये सहृदयस्य नेत्राणि आर्द्रं भवेत् तर्हि काव्यस्य साफल्ये संदेहस्य सम्भावना नावशिष्यते । साहित्यदर्पणकारेण स्वग्रन्थे करुणरसस्य परिभाषा भाषते –

इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत् ।
धीरैः कपोतवर्णोऽयं कथितो यमदैवतः ॥
शोकोऽत्र स्थायिभावः स्याच्छोच्यमालम्बनं मतम् ।
तस्य दाहादिकावस्था भवेदुद्दीपनं पुनः ॥
अनुभावा दैवनिन्दाभूपातक्रन्दितादयः ।
वैवर्ण्योच्छ्वासनिःश्वासस्तम्भप्रलपनानि च ॥

[1] उत्तररामचरिते ३/४७

निर्वेदमोहापस्मारव्याधिग्लानिस्मृतिश्रमाः ।

विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः ॥[१]

इष्टवस्तुनाशादनिष्टप्राप्तेः करुणरसस्योत्पत्तिर्भवत्येव । करुणस्य विषये काव्यज्ञैरुद्घाटितः, अस्य कपोतवर्णः यमो देवता चास्ति । करुणरसस्य स्थायिभावः शोकः विद्यते अयं भाव सातत्यरूपेण सहृदयानां हृदिषु सुसुप्तावस्थायां विद्यते । यदा सहृदयस्य हृदये दुःखविषयकघटना संघटते तर्हि शोकस्थायिभावस्य हृदये उत्पत्तिर्जायते । शोकस्थायिभावस्य विषये विश्वनाथेन कथितम् --

इष्टनाशादिभिश्चेतो वैक्लव्यं शोकशब्दभाक् ।[२]

मनोऽभिलषितवस्तुनः नष्टादप्रियवस्तुप्राप्तेः शोकस्थायिभावः उद्भवति ।

करुणरसस्योद्भावना हृदये यदोद्पद्यते तदा पीडा संजायते –

विपिने क्व जटानिबन्धनं ? तव चेदं क्व मनोहरं वपुः ।

अनयोर्घटनावोधेः स्फुटं ननु खड्गेन शिरीषकर्तनम् ॥[३]

अत्र पद्येऽस्मिन् रामवनवासजनितदुःखेन पीडितः दशरथः, तेन दैवनिन्दायाः वर्णनं प्रस्फुटितम् । अत्र रामः आलम्बनम् विभावः, तस्य वनगमनोद्यतः उद्दीपनविभावः, दैवनिन्दा अनुभावः, ग्लानिविषादादि व्यभिचारिणः, शोकः स्थायिभावः भवतीति ।

श्रीमद्भागवते करुणरसस्य चारुचित्रणं चित्रितम् । ग्रन्थेऽस्मिन् रसानां वर्णनमनेकेषु स्थलेषु अनेकेषु पद्येषु संप्राप्यते । अयं रसः सुकोमलः मर्मान्वितहृदयस्पर्शिणः चास्ति । षष्ठे स्कन्धे चित्रकेतोः प्रसङ्गे करुणरसस्य वर्णनं

---

[1] साहित्यदपणे ३/२२५

[2] साहित्यदर्पणे ३/१७७ पूर्वार्द्ध

[3] साहित्यदर्पणे पृ. ३१९

प्राप्नोति । चित्रकेतुः सन्ततेर्प्राप्तये अङ्गिरामहर्षिद्वारा यज्ञं कारयितवान् । फलस्वरूपेण कृतद्युतिपत्नीगर्भात् पुत्ररत्नमजायत । परञ्च अन्याः राज्यः कृतिद्युत्यै द्रुह्यन्ति । तस्मात् कारणात् तस्याः पुत्रं विषपानं कारयितवत्यः शिशोः मृत्युं प्राप्तवान् । स्वपुत्रं मृतं दृष्ट्वा कृतद्युति विललाप –

तस्यास्तदाऽऽकर्ण्य भृशातुरं स्वरं घ्नन्त्याः कराभ्यामुर उच्चकैरपि ।
प्रविश्य राज्ञी त्वरयाऽऽत्मजान्तिकं ददर्श बालं सहसा मृतं सुतम् ॥
पपात भूमौ परिवृद्धया शुचा मुमोह विभ्रष्टशिरोरुहाम्बरा ॥
ततो नृपान्तःपुरवर्तिनो जना नराश्च नार्यश्च निशम्य रोदनम् ।
आगत्य तुल्यव्यसनाः सुदुःखितताश्च व्यलीकं रुरुदुः कृतागसः ॥
श्रुत्वा मृतं पुत्रमलक्षितान्तकं विनष्टदृष्टिः प्रपतन् स्खलन् पथि ।
स्नेहानुबन्धैधितया शुचा भृशं विमूर्च्छितोऽनुप्रकृतिर्द्विजैर्वृतः ॥[१]

अरे विधातः ! त्वं सत्यं हि मूर्खोऽसि, य स्वसृष्टेः प्रतिकूलं चेष्टते । महदाश्चर्यमिदं बृद्धजनाः जीवन्ति बालकाश्च मृत्युं प्राप्नुवन्ति । तव स्वभावे विपरीतता दृश्यते त्वं तु जीवानां रिपुरसि ।

अहो विधातस्त्वमतीव बालिशो यस्त्वात्मसृष्ट्यप्रतिरूपमीहसे ।
परेऽनुजीवत्यपरस्य या मृतिर् विपर्ययश्चेत्त्वमसि ध्रुवः परः ॥[२]

स्वशिशुं स्वाङ्के नीत्वा विलापं कुर्वती वदति – हे वत्स ! तव विना अहन्तु दीनमनाथञ्च अस्मि । मां विहाय कुत्र गच्छसि ? ।

---

[1] श्रीमद्भागवते ६/१४/४७-५०
[2] श्रीमद्भागवते ६/१४/५४

त्वं तात नार्हसि च मां कृपणामनाथां
त्यक्तुं विचक्ष्व पितरं तव शोकतप्तम् ।
अञ्जस्तरेम भवताप्रजदुस्तरं यद्
ध्वान्तं न याह्यकरुणेन यमेन दूरम् ॥
उत्तिष्ठ तात त इमे शिशवो वयस्यास्त्वा–
माह्वयन्तिनृपनन्दन संविहर्तुम् ।
सुप्तश्चिरं ह्यशनया च भवान् परीतो
भुङ्क्ष्व स्तनं पिब शुचो हर नः स्वकानाम् ॥[१]
तयोर्विलपतोः सर्वे दम्पत्योस्तदनुव्रताः ।
रुरुदुः स्म नरा नार्यः सर्वमासीदचेतनम् ॥[२]

करुणरसस्योदाहरणमिदं सर्वोत्कृष्टरूपेण कथयितुं शक्यते । अत्र रसोत्पत्तिविषयकानि सर्वाणि अवयवानि परिपूर्णरूपेण दृग्गोचराणि भवन्ति । अत्र स्थायिभावः शोकः समग्रदृश्ये आदावन्ते विद्यमानोऽस्ति । नृपः राज्ञी मन्त्रिगणाः नगरवासिनश्च आलम्बन विभावेन वर्तते । तथा माता स्वपुत्रं उत्थायितुं प्रतीक्षारतः उद्दीपनविभावः अस्ति । राज्ञीनृपयोः विलापं मूर्च्छादिप्राप्तः स एव अनुभावः वर्तते । विषादः, मोहः, चिन्ता, उन्मादादयः व्यभिचारिभावः अस्ति ।

प्रथमे स्कन्धे अश्वत्थाम्ना द्रोपदेः पुत्राणां शिरोच्छेदनप्रसङ्गे अतीव करुणरसस्य वर्णनं प्राप्यते । अयं प्रसङ्गः करुणरसस्य जीवन्तोदाहरणं वर्तते । यदा द्रोपदी स्वपुत्राणां निधनविषये वृत्तं संप्राप्य तन्मनसि वज्रपातोऽभवत् । अश्रुपूरितः अत्यन्तखिन्नमनः, दीनावस्था च जाता –

[1] श्रीमद्भागवते ६/१४/५६–५७
[2] श्रीमद्भागवते ६/१४/६०

माता शिशूनां निधनं सुतानां निशम्य घोरं परितप्यमाना ।

तदारुदद्बाष्पकलाकुलाक्षी तां सान्त्वयन्नाह किरीटमाली ॥[१]

श्लोकेऽस्मिन् करुणरसे द्रोपद्यर्जुनौ आलम्बनम्, पुत्रनिधनवृत्तं उद्दीपनम्, द्रोपदेः विलापः अनुभावः, विषादः, चिन्ता इत्यादयः व्यभिचारिभावः एतत्सर्वमाहृत्यात्र करुणरसं पुष्णाति ।

भागवतस्य दशमस्कन्धे तृणावर्तद्वारा कृष्णस्यापहरणपश्चात् यशोदागोप्यादीनां दशायाः वर्णने करुणरसस्य विलक्षणता दृष्टुं शक्यते –

इति खरपवनचक्रपांशुवर्षे

सुतपदवीमबलाविलक्ष्य माता ।

अतिकरुणमनुस्मरन्त्यशोचद्

भुवि पतिता मृतवत्सका यथा गौः ॥[२]

स्वपुत्रं दृष्ट्वा यशोदा शोकातुरा जाता पुत्रस्य स्मृत्वा दीनाभवत् यथा वत्सं विहाय गोः दशा भवति तथैव गोप्यः अपि उच्चस्वरेण क्रन्दति ।

कृष्णबलरामयोः मथुरागमनसमये सर्वासां गोपीनां कीदृशी दशा जाता तदत्र प्रस्तुतम् । रामकृष्णौ मथुरासम्प्राप्तौ इतिवृत्तं संवेद्य सर्वाः गोप्यः व्याकुलाः जाताः । सर्वासां गोपीनां वाष्पश्वसनं प्रचलन्ति –

गोप्यस्तास्तदुपश्रुत्य बभूवुर्व्यथिता भृशम् ।

रामकृष्णौ पुरीं नेतुमक्रूरं व्रजमागतम् ॥

---

1 श्रीमद्भागवते १/७/१५

2 श्रीमद्भागवते १०/७/२४

काश्चित्तत्कृतहृत्तापश्वासम्लानमुखश्रियः ।

स्रंसद्दुकूलवलयकेशग्रन्थ्यश्च काश्चन ॥[१]

अत्र गोप्यः आलम्बनम्, कृष्णविरहवृत्तउद्दीपनम्, हृदयस्य पीडा, वाष्पश्वसनं, अरिः अनुभावोऽस्ति, विषादः जडता, उन्मादः चिन्तादयः संचारिभावः।

रासलीलायाः प्रसङ्गे करुणविप्रलम्भस्य अद्भुतनिदर्शनं विद्यते । कृष्णस्य तिरोभावं दृष्ट्वा गोपाङ्गनां व्याक्रन्दनदशा समजायत ।

हा नाथ रमण प्रेष्ठ क्वासि क्वासि महाभुज ।

दास्यास्ते कृपणाया मे सखे दर्शय सन्निधम् ॥[२]

हा नाथ ! हा रमण ! हा प्रेष्ठ ! त्वं कुत्र गच्छसि ? मम सखा, वयं तव चरणदासी स्मः । झटिति एव सन्निधिः अनुभाव्यते । तदनन्तरं गोप्यः गोपीगीतं गायन्ति –

शरदुदाशये साधुजातसत्

सरसिजोदरश्रीमुषा दृशा ।

सुरतनाथ तेऽशुल्कदासिका

वरद निघ्नतो नेह किं वधः ॥[३]

हे प्रेमपरिपूर्णपुरुषोत्तम ! हृदयस्य स्वामि ! वयं तव अशुल्कदासिकाः स्मः । त्वं तु शरत्कालीकजलाशये सुन्दरातिसुन्दरसरसिजस्य कर्णिकयाः सौन्दर्यं नेत्रयोः अपहरति ताभ्यां नेत्राभ्यां अस्माकं उपरि आघातं करोषि । अस्त्रैः हननं एव

---

[1] श्रीमद्भागवते १०/२९/१३–१४

[2] श्रीमद्भागवते १०/३०/४०

[3] श्रीमद्भागवते  १०/३१/२

वधः भवति तर्हि किं नेत्राभ्यां हननं वधः नास्ति ? । तव मूल्यरहिताः दासिकाः वयम्, अस्मान् निघ्ननन् त्वया क्रियामाणा क्रिया इहलोके वधो न भवति किम् ?

इत्थं प्रकारेण श्रीमद्भागवते करुणरसस्य वर्णनं नैकेषु स्थलेषु सम्प्राप्यते । चित्रकेतोः पत्न्यः च रुदनं, द्रोपदीपुत्राणां वधं, गोपीनां कृष्णविरहः, ग्वालबालानां कृष्णात् विच्छेदः, उद्धवमाध्यमेन सन्देशः सम्प्राप्य गोपीनां दशा, कृष्णविरहे गोपीगीतं, भ्रमरगीतं च, सर्वं करुणरसान्वितमुद्दाहरणं विद्यते ।

## श्रीमद्भागवते रौद्ररसस्य वर्णनम्

ब्रह्माविष्णुरुद्राः येषु देवेषु रुद्रस्य कार्यं संहारोऽस्ति । वस्तुतः संहारेऽपि नवसृष्ट्याः बीजं सन्निहितं विद्यते । अयमेव रुद्रः रौद्ररसस्याधिष्ठातृदेवतास्ति । अस्मिन् आलम्बनरूपेण शत्रूणां वर्णनं भवति । अस्य चेष्टाः उद्दीपनविभावोऽस्ति । रौद्ररसस्य परिभाषा साहित्यदर्पणकारेण निगदितम् यत् –

रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः ।
आलम्बनमरिस्तत्र तच्चेष्टोद्दीपनं मतम् ॥[1]

अस्य विशेषता उद्दीप्तिः मुष्टिप्रहारः, भूपातनम्, भयावहः प्रहारं, शरीरविदारणम्, सङ्ग्रामः, सम्भ्रमादयभिः जायते –

मुष्टिप्रहार पातनविकृतच्छेदावदारणैश्चैव ।
संग्रामसम्भ्रमाद्यैरस्योद्दीप्तिर्भवेत् प्रौढा ।[2]

श्रीमद्भागवते रौद्ररसस्योदाहरणान्यनेकेषु स्थलेषु समुपलब्धानि । सप्तमस्कन्धे भगवतः नृसिंहावतारवर्णनमायाति । यदा दैत्यराजः हिरण्यकशिपुः

---

[1] साहित्यदर्पणे ३/२२७

[2] साहित्यदर्पणः ३/२२८

प्रह्लादं हन्तुं तत्परैः अभवत् तदा तद्समये भगवान्विष्णुः नृसिंहरूपं धृत्वा प्रकटयति स्म । भगवतः नृसिंहस्य रूपमत्यन्तभयानकोऽस्ति –

प्रतप्तचामीकरचण्डलोचनं स्फुरत्सटाकेसरजृम्भिताननम् ।

करालदंष्ट्रं करवालचञ्चलक्षुरान्तजिह्वं भ्रुकुटीमुखोल्बणम् ॥

स्तब्धोर्ध्वकर्णं गिरिकन्दराद्भुतव्यात्तास्यनासं हनुभेदभीषणम् ।[१]

नृसिंहहिरण्यकशिपोर्मध्ये युद्धमभवत् । भगवान् उच्चस्वरेण अट्टहासं अकरोत् येन हिरण्यकशिपोः नेत्रे निमीलयति । भगवान् तं ग्रहीतं यथा सर्पः मूषकं संग्रहीतम् । भगवान् नृसिंहः तं सभायाः द्वारे नीत्वा जंघोपरिनिपत्य क्रीडन् कुर्वन् स्वनखाग्रपातैः ददार यथाहि गरुडः महाविषम् । तत्समये तस्य नृसिहस्य क्रोधपूर्णनेत्रे दृष्टुं कोऽपि नैव समर्थः । स्वजिह्वया मुखस्य अलेट् । रक्तस्य विन्दुभिः तस्य नृंसिंहस्य मुखं केशञ्च रक्तयुक्तं रक्तवर्णं भवति । नृसिंहः यथा शोभायमानः भवति तथा गजं निगत्य आन्त्रमालां कण्ठे धारयन् केसरी शोभते तथैव प्रतीयते –

संरम्भदुष्प्रेक्ष्यकराललोचनो व्यात्ताननान्तं विलिहन्स्वजिह्वया ।

असृग्लवाक्तारुणकेसराननो यथान्त्रमाली द्विपहत्यया हरिः ॥[२]

नखाङ्कुरोत्पाटितहृत्सरोरुहं विसृज्य तस्यानुचरानुदायुधान् ।

अहन् समन्तान्नखशस्त्रपार्ष्णिभिर्दोर्दण्डयूथेऽनुपथान् सहस्रशः ॥[३]

नृसिंहस्य कण्ठस्य केशस्य धुनोति सरोरुहं इतस्ततः जातम् । नेत्रज्वालया सूर्यादयोऽपि नैव भासते । श्वासेन सागरं क्षुब्धं जातम् । पादैः ध्वनिना

---

[1] श्रीमद्भागवते ७/८/२१
[2] श्रीमद्भागवते ७/८/३०
[3] श्रीमद्भागवते ७/८/३१

भूकम्पः आगतः । तस्य क्रोधे वृद्धिरेव अभूत् । तस्य तेजसां क्रोधेन च भयानकमुखं दृष्ट्वा तं पार्श्वं गन्तुं केषामपि साहसं नैव अभूवन् ।

अत्र प्रसङ्गेऽस्मिन् सर्वं रौद्ररसानुकूलं विद्यते । नृसिंहरूपं आलम्बनस्य भयानकचेष्टा यथा हिरण्यकशिपुं विदारणम्, तं पतित्वा तस्य रक्तपानं करणम् । तस्य आन्त्रमालां धारणम्, अट्टहासकरणम् इत्यादीनि दृश्यानि अत्र रौद्ररसस्य स्थायिभावक्रोधं उद्दीपितं करोति । उग्रता, आवेगः, स्वेदः, कम्पः, क्रूरतादयः अनुभावोऽस्ति ।

अनेन प्रकारेण रौद्ररसस्य वर्णनं श्रीमद्भागवते अनेकेषु स्थलेषु प्रसंगेषु च समुपलभ्यते । श्रीकृष्णकालियनागयोर्मध्ये युद्धसमयेऽपि तत्र रौद्ररसस्याविर्भावो जातः ।

श्रीमद्भागवते वीररसस्य वर्णनम्

वीररसस्य स्थायिभावः उत्साहोऽस्ति । अस्याश्रयः उत्तमप्रकृतेः जनाः सन्ति । अस्य हेमवर्णोऽस्ति महेन्द्रः च देवतास्ति –

उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः ।
महेन्द्रदेवतो हेमवर्णोऽयं समुदाहृतः ॥[१]

अस्यालम्बनं विभावः विजेतव्यशत्र्वादयस्सन्ति, एतेषां शत्रूणां चेष्टाः अस्य वीररसस्योद्दीपनविभावोऽस्ति –

आलम्बनविभावास्तु विजेतव्यादयो मताः ।
विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपिणः ॥[२]

[1] साहित्यदर्पणे ३/२३२
[2] साहित्यदर्पणे ३/२३३

युद्धस्य सामग्र्यान्यन्यसहायकसाधनानां वा अन्वेषणमस्य अनुभावोऽस्ति । धृति–मति–स्मृति–तर्क–रोमाञ्चादयश्च अस्य व्यभिचारिभावाः वर्तन्ते –

अनुभावस्तु तत्र स्युः सहायान्वेषणादयः ।

सञ्चारिणस्तु धृतिमतिगर्वस्मृतितर्करोमाञ्चाः ॥

स च दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्धा स्यात् ॥[१]

साहित्यदर्पणकारेण वीररसस्य चत्वारः भेदाः सङ्कल्पिताः – दानवीरः, धर्मवीरः, युद्धवीरः, दयावीरश्च । विषयेऽस्मिन् पण्डितराज–जगनाथस्यात्यन्तरमणीयतममस्ति । तेन मन्यते यत् यदि अस्माभिः इत्थं वीररसस्य विभाजनं क्रियते तर्हि तु इदं वर्गीकरणमनन्तं भविष्यत्येव तथा पुनः अस्य भेदः दान–धर्म–युद्ध–दयाभिः सह विद्यावीरोऽपि मंस्यन्ते ।

श्रीमद्भागवते अनेकेषु स्थलेषु वीररसस्योल्लेखः प्राप्यते । श्रीकृष्णस्य बाललीलासु यथा – कंसेन प्रेषितराक्षसादीनां वधानां प्रसङ्गेषु वृत्रासुरादयः । परमभगवद्भक्तजनानां युद्धप्रसङ्गेषु यथा राजावलि–इत्यादीनां दानवीरतायाः प्रसङ्गेष्वस्य रसस्य उद्रेकः महदद्भुतप्रभावेणाभवत् ।

तृतीयस्कन्धे वराहवतारस्य वर्णने परमबलशालीविश्वविजेता–हिरण्याक्षेण सह भगवतः श्रीविष्णोः विशालयुद्धमभवत् । भगवानादिवराहः अत्र वीररसस्य आश्रयोऽस्ति । हिरण्याक्षः आलम्बनमस्ति । युयुत्सुहिरण्याक्षस्य चेष्टाः इमं रसमत्यन्तोद्दीप्तं कुर्वन्ति । अत्र हिरण्याक्षः भगवन्तं या या मर्मान्तिकीवार्ता स्वशक्तेरहङ्कारवशी भूत्वा कथयति सा दृष्टव्या –

---

[1] साहित्यदर्पणे ३/२३४

आहैनमेह्यज्ञ महीं विमुञ्च नो

रसौकसां विश्वसृजेयमर्पिता ।

न स्वस्ति यास्यस्यनया ममेक्षतः

सुराधमासादितसूकराकृते ॥[१]

सः कथयति – अरे अज्ञ! अत्रागच्छ, इमां भूमिं परित्यज, धरामिमां ब्रह्मणा अस्मान् रसातलवासिनां दैत्यानां समर्पणं कृतम् । रे सूकररूपधारी सुराधम! मम पश्यन् त्वं इमां भूमिं कुशलपूर्वकं नैव नेतुं शक्नोसि ।

त्वं नः सपत्नैरभवाय किं भृतो

यो मायया हन्त्यसुरान् परोक्षजित् ।

त्वां योगमायाबलमल्पपौरुषं

संस्थाप्य मूढ प्रमृजे सुहृच्छुचः ॥[२]

त्वं मायाबलत्त्वेन लीलया च दैत्यान् जयसि मारयसि च । किमनेन कारणेन अस्माकं शत्रवः नाशनार्थं पालयसि । मूर्ख ! तव योगमायायाः अतिरिक्तं त्वयि कोऽप्यन्यपौरुषः नास्त्येव । अद्याहं त्वां समाप्य स्वबन्धूनां शोकं निवारयामि ।

हिरण्याक्षस्येदं वचनं तस्य प्रचण्डपराक्रमः तथा युद्धकर्तुमुत्साहः व्यग्रता च प्रदर्शयति । अपि च अस्मिन् प्रसङ्गे उद्दीपनस्य कार्यं करोति । हिरण्याक्षेण गर्वोक्तिः स्मृतादयः व्यभिचारिभावः रसस्य श्रीवृद्धौ सहायकः सिद्धयति । हिरण्याक्षस्य गदादिशस्त्राणि अनुभावोऽस्ति । येषां सर्वेषां रसावयवानां सहाय्येन अत्र युद्धवीररसस्य पुष्टिरजायत ।

---

[1] श्रीमद्भागवते ३/१८/३

[2] श्रीमद्भागवते ३/१८/४

श्रीमद्भागवते भयानकरसस्य वर्णनम्

भयानकरसस्य स्थायिभावः भयोऽस्ति । अस्य कृष्णवर्णः कालो देवता चास्ति । विद्वद्भिः अस्याश्रयः स्त्रीनीचप्रकृतिवान् मन्यन्ते –

भयानकौ भयस्थायिभावो भूताधिदैवतः ।
स्त्रीनीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः ॥[१]

श्रीमद्भागवते अस्य रसस्य अनेकेषु स्थलेषु वर्णनं सम्प्राप्नोति । विशेषतः कंसेन प्रेषितराक्षसः यदा श्रीकृष्णं हन्तुं आगतः तत्र भयानकरसस्य दर्शनं सञ्जातम् । तृणावर्तराक्षसः बवंडररूपेण गोकुले आगत्य कृष्णं नीत्वा आकाशे उड्डयति स्म । समग्रगोकुलं धूलिधूसिरं कृतवान् । तृणावर्तस्य घोरशब्देन दिशः कम्पयन्ति –

गोकुलं सर्वमावृण्वन् मुष्णंचक्षूंषि रेणुभिः ।
ईरयन् सुमहाघोरशब्देन प्रदिशो दिशः ॥[२]

समग्रगोकुलं क्षणमात्रे एव रजोमयं जातम् । यशोदा स्वपुत्रं श्रीकृष्णं यत्र असीदयत् तत्र नैव अपश्यन् –

मुहूर्तमभवद् गोष्ठं रजसा तमसाऽऽवृतम् ।
सुतं यशोदा नापश्यन्तस्मिन् न्यस्तवती यतः ॥

अत्र तृणावर्तस्य गर्जना आलम्बनम्, गर्जनाकारणात् यशोदाया अन्यगोकुलवासिनां हृदये भयोत्पत्तिरजायत सः स्थायिभावः । तेन कारणेन कम्पः , उस्विघ्नतादयः अनुभावः । शंका, दीनता, सम्भ्रमादयः व्यभिचारीभावास्सन्ति ।

[1] साहित्यदर्पणे 3/235
[2] श्रीमद्भागवते १०/७/२१

दशमस्कन्धे पूतनाराक्षस्याः अपि प्रसङ्गे भयानकरसोत्पत्तिर्जायते । श्रीकृष्णेन पूतनायाः वधः कृतः । पूतनायाः शरीरं षड्क्रोशपरिमिते क्षेत्रे प्रससार तत्रात्यः सर्वे वृक्षाः नष्टाः जाताः । पूतनायाः शरीरमत्यन्तविकरालः भयानकदंष्ट्रः, गिरिकन्दरवन्नासिकम्, गण्डशैलसमानं स्तनम्, रक्तवर्णाः केशाः आसन्, अन्धकूपमिव अक्षम् आसीत्, पुलिनवत् पादम्, उदरन्तु शुष्कसरोवरवदासीत्–

ईषामात्रोग्रदंष्ट्रास्यं गिरिकन्दनासिकम् ।

गण्डशैलस्तं रौद्रं प्रकीर्णारूणमूर्धजम् ॥

अन्धकूपगभीराक्षं पुलिनारोहभीषणम् ।

बद्धसेतुभुजोर्वङ्घि शून्यतोयहृदोदरम् ॥[१]

पूतनायाः शरीरं दृष्ट्वा सर्वे गोपाः गोपिकाश्च भयभीतमभवन् । तस्याः तीक्ष्णस्वरेण गोपानां गोपीकानां च हृद्कर्णमस्तकाः पूर्वमेव संतृस्ताः ।

सन्तत्रसुः स्म तद्वीक्ष्य गोपा गोप्यः कलेवरम् ।

पूर्वं तु तन्निःस्वनितभिन्नहृत्कर्णमस्तकाः ॥[२]

अत्र पूतनायाः भयङ्करचेष्टाः तथा गोपगोपीनां भयानकरसानुकूलत्वात् भयनामकः स्थायिभावः प्रकटयति ।

श्रीमद्भागवते बीभत्सरसस्य वर्णनम्

बीभत्सरसस्य स्थायिभावः जुगुप्सा वर्तते । अस्य नीलवर्णः महाकालदेवता चास्ति –

जुगुप्सास्थायिभावस्तु बीभत्सः कथ्यते रसः ।

---

[1] श्रीमद्भागवते १०/६/१५–१६

[2] श्रीमद्भागवते १०/६/१७

नीलवर्णो महाकाल दैवतोऽयमुदाहृतः ॥

दुर्गन्धमांसरुधिरमेदांस्यालम्वनं मतम् ।

तत्रैव कृमिपातद्यमुद्दीपनमुदाहृतम् ॥[१]

अत्र रसस्यास्यालम्बनं दुर्गन्धिपूर्णपदार्थाः सन्ति । यथा –मांस–रक्त–मेदादयः । एषु पदार्थेषु कीटोत्पत्तिः एव उद्दीपनमस्ति । निष्ठीवनास्यालम्बनम् – नेत्रसंकोचनादयः अस्यानुभावः तथा मोहः, अपस्मारः, आवेगः, व्याधिः, मरणादयः व्यभिचारिभावो वर्तन्ते ।

श्रीमद्भागवते बीभत्सरसस्य प्रयोगः अल्परूपेण सम्प्राप्यते । पञ्चमस्कन्धे ऋषभदेवचरिते अस्योदाहरणं समुपलब्धम् । ऋषभदेवेन जगतः भोगादिवस्तुभ्यः विरक्तभूतत्त्वाद् कारणातवधूतवृत्तिः अवधारयते । मूकवधिरमत्तवत् क्रियाः कुर्वन् भ्रमति । इत्थं दशां दृष्ट्वा मनुष्यान् ऋषभात् जुगुप्सन्ते –

तत्र तत्र पुरग्रामाकरखेटवाटखर्वटशिबिरव्रजघोष–

सार्थगिरिवनाश्रमादिष्वनुपथमवनिचरापसदैः

परिभूयमानोमक्षिकाभिरिव वनगजस्तर्जनताडना–

वमेहनष्ठीवनग्रावशकृद्रजः प्रक्षेपपूतिवातदुरुक्तै–

स्तदविगणयन्नेवासत्संस्थानएतस्मिन् देहोपलक्षणे

सदपदेश उभयानुभवस्वरूपेण स्वमहिमावस्थानेना–

समारोपिताहंममाभिमानत्वादविखण्डितमनाः

पृथिवीमेकचरः परिबभ्राम ॥[२]

---

१ साहित्यदर्पणे ३/२३९

2 श्रीमद्भागवते ५/५/३०

अत्र बीभत्सरसस्य स्थायिभावः जुगुप्सायाः अनुरूपं यत् ऋषभदेवः मलमूत्रादिसंलिप्तवर्णनं विद्यते । ऋषभदेवस्य देहाभिमानशून्यतायाः वर्णनमस्ति । अत्र बीभत्सरसस्य प्रतीतिरजायत ।

पञ्चमस्कन्धे नरकादीनां वर्णनमागतम् । ये नृपाः श्रेष्ठकुलोत्पन्नत्वादपि धर्ममर्यादां परित्यजन्ति तान् वैतरणीनद्यां क्षेपयन्ति । नदीयं मलमूत्रविष्ठारक्तकेशनखास्थिमेदामांसादिदुर्गन्धपदार्थैः परिपूर्णा जाता –

ये त्विह वै राजन्या राजपुरुषा वा अपाखण्डा धर्मसेतून्
भिन्दन्ति सम्परेत्य वैतरण्यां निपतन्ति भिन्नमर्यादास्तस्यां

निरयपरिखाभूतायां नद्यां यादोगणैरिततस्ततो
भक्ष्यमाणाआत्मना न वियुज्यमानाश्चसुभिरुह्यमानाः
स्वाघेन कर्मपाकमनुस्मरन्तो विण्मूत्रपूयशोणित–
केशनखास्थिमेदोमांसवसावाहिन्यामुपतप्यन्ते ।[1]

अत्र मलमूत्रादिवस्तूनां वर्णने नृपादीनां क्षेपणकारणेन जुगुप्सा स्थायिभावः वीभत्सरसः सन्दृश्यते ।

श्रीमद्भागवते अद्भुतरसस्य वर्णनम्

अद्भुतरस्य स्थायिभावः विस्मयोऽस्ति, पीतवर्णः गन्धर्वदेवता चास्ति –

अद्भुतो विस्मयस्थायिभावो गन्धर्वदैवतः ॥
पीतवर्णो वस्तु लोकातिगमालम्बनं मतम् ।
गुणानां तस्य महिमा भवेदुद्दीपनं पुनः ॥

[1] श्रीमद्भागवते ५/२६/२२

स्तम्भः स्वेदोऽथ रोमाञ्चगद्गदस्वरसम्भ्रमाः ।

तथा नेत्रविकासाद्या अनुभावाः प्रकीर्तिताः ॥

वितर्कावेगसम्भ्रान्तिहर्षाद्या व्यभिचारिणः ।[१]

अस्य रसस्यालम्बनमलौकिकवस्तु अस्ति । अलौकिकवस्तोः गुणकीर्तनमस्योद्दीपनमस्ति, स्तम्भ–स्वेद–रोमाञ्च–गद्गदस्वर–सम्भ्रम–नेत्रविकसादयः अस्यानुभावोऽस्ति । वितर्कावेशसम्भ्रमहर्षादयः अस्य व्यभिचारिभावः वर्तते ।

अत्र अद्भुतरसः अलौकिकचमत्कारप्रमाणोऽस्ति । अत्र चमत्कारशब्दस्य प्रयोगः विस्मयाय आश्चर्याय वा प्रयोगः क्रियते । विस्मयेन सामाजिकस्य चित्तस्य विस्तारो जायते–

विविधेषु पदार्थेषु लोकासीमान्तिवर्तिषु ।

विस्मयश्चित्तविस्तारो वस्तुमाहात्म्य दर्शनात् ॥[२]

श्रीमद्भागवतमहापुराणे अद्भुतरसस्य वर्णनं अनेकेषु स्थलेषु सम्प्राप्नोति । अस्य ग्रन्थस्य रचनैव लीलापुरुषोतमस्याद्भुतदिव्यलीलानां वर्णनहेतवे अभवत् । अद्भुतरसस्योदाहरणानि कतिपयानि प्राप्तानि ग्रन्थेऽस्मिन् । अष्टमे स्कन्धे भगवतः विष्णोः वामनावतारस्य प्रसङ्गे अस्य वर्णनं सञ्जातम् । नृपेण बलिना वामनाय पादत्रयं भूमिं दानदातुं संकल्पं कृतं तदा आकाशे स्थिताः देवगन्धर्वविद्याधरसिद्धादयः पुष्पवृष्टिः अकुर्वन्, दुन्दुभिः नेदुः । तदा एकालौकिकघटना घटिता । बलिना यदा संकल्पं कृत्वा ततः परं भगवतः वामनस्य

---

[1] साहित्यदर्पणे ३/२४२–२४४

[2] साहित्यदर्पणे

शरीरम् एधते । बृहदाकाररूपान्तर्गते सर्वे पृथ्वी–आकाश–दिक्–द्वर्ग–पाताल–समुद्र–पशुपक्षी–मनुष्य–देवता–ऋष्यादयः समाहिताः सन्ति ।

तद् वामनं रूपमवर्धताद्भुतं हरेरनन्तस्य गुणत्रयात्मकम् ।
भूः खं दिशो द्यौर्विवराः पयोधयस्तिर्यङ् नृदेवा ऋषयो यदासत ॥
काये बलिस्तस्य महाविभूतेः सहर्त्विगाचार्यसदस्य एतत् ।
ददर्श विश्वं त्रिगुणं गुणात्मके भूतेन्द्रियार्थाशयजीवयुक्तम् ॥[1]

अत्र सम्पूर्णप्रसङ्गे अद्भुतरसस्य वर्णनं सञ्जातम् । अत्र भगवान् वामनः आलम्बनविभावोऽस्ति, तस्य अलौकिकलीलादर्शनमुद्दीपनमस्ति । भगवतः रूपं दृष्ट्वा रोमाञ्चवेगादयः व्यभिचारिभावः । समग्रे प्रसङ्गे वामनस्याद्भुत्लीलावतारस्य वर्णनमस्ति, येन सहृदयानां सामाजिकानां हृदये विस्मयस्य स्थायिभावस्य चर्वणा प्रतिभाति ।

एकादशस्कन्धेऽपि भगवतः कृष्णस्य परलोकगमनस्याद्भुतवर्णनं समुपलब्धम् । भगवतः परमधामगमनलीलां दर्शनाय ब्रह्मा–शिव–पार्वती–इन्द्रादिलोकपाल–प्रजापति–ऋषि–मुनि–पितर–सिद्धादयः आगताः । सर्वे भगवतः लीलानां गानं कुर्वन्ति । अकाशात् पुष्पवृष्टिः भूता । स्वर्गलोके दुन्दुभिः वादयति स्म ।

भगवान् पितामहं वीक्ष्य विभूतिरात्मनो विभुः ।
संयोज्यात्मनि चात्मानं पद्मनेत्रे न्यमीलयत् ।
लोकाभिरामां स्वतनुं धारणाध्यानमङ्गलम् ।
योगधारणयाऽऽग्नेय्यादग्ध्वा धामाविशत् स्वकम् ॥[1]

[1] श्रीमद्भागवते ८/२०/२१–२२

यदा भगवान् श्रीकृष्णः स्वलोके प्रविशन्तं तदाब्रह्मादिदेवतापि तस्य गतिं नैव द्रष्टुं शक्यते अनेन कारणेन ते सर्वे विस्मितमभूवन् –

देवादयो ब्रह्ममुख्या न विशन्तं स्वधामनि ।
अविज्ञातगतिं कृष्णं ददृशुश्चातिविस्मिताः ॥[२]

अत्र भगवान् श्रीकृष्णः आलम्बनमस्ति । ब्रह्मा–शिव–पार्वती–इन्द्रादिलोकपाल–प्रजापति–ऋषि–मुनिभिः कृष्णस्य लीलानां गानं, भक्तिपूर्वकवृष्टिः, भगवतः सशरीरं परमधामगमनं एषां सर्वेषामद्भुतरसस्योद्दीपनमस्ति । रोमाञ्चादयः अनुभावः, हर्षादयः व्यभिचारिभावोऽस्ति । आकाशीयविद्युतगत्या सह श्रीकृष्णस्य गतितुलना अस्य दृश्यस्य चमत्कारोत्पादकं भवति । सम्पूर्णभागवते अद्भुतरसस्य वर्णनं पदे पदे सन्दृश्यते ।

## श्रीमद्भागवते शान्तरसस्य वर्णनम्

शान्तरसस्य स्थायिभावः शमोऽस्ति देवता नारायणोऽस्ति । अस्याश्रयः उत्तमप्रकृतेः जनास्सन्ति । अस्याश्रयः उत्तमप्रकृतेः जनास्सन्ति । शान्तरसस्य परिभाषेयं वर्तते –

शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः ॥
कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः ।
अनित्यत्वादिनाऽशेषवस्तुनिःसारता तु या ॥
परमात्मस्वरूपं वा तस्यालम्बनमिष्यते ।
पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः ॥

---

[1] श्रीमद्भागवते ११/३१/५–६

[2] श्रीमद्भागवते ११/३१/८

महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः ।

रोमाञ्चाद्याश्चाऽनुभावास्तथा स्युर्व्यभिचारिणः ॥

निर्वेदहर्षस्मरणमतिभूतदयादयः ।[१]

अनित्यताकारणत्वाद् समग्रसांसारिकवस्तूनाम् असाररूपतायाः ज्ञानं तथा परमात्मनः स्वरूपस्य ज्ञानम् अस्य रसस्यालम्बनं मन्यते । पवित्राश्रयस्थलम्, भगवतः पवित्रतीर्थस्थलम्, सुशोभनं वनम्, महापुरुषाणां सङ्गादयः अस्योद्दीपनमस्ति । रोमाञ्चादयः अनुभावोऽस्ति । निर्वेदः, हर्षः, स्मृतिः, मतिः, जीवदया इत्यादयः अस्य रसस्य व्यभिचारिभावोऽस्ति ।

श्रीमद्भागवते शान्तरसस्य वर्णनं असकृत्बारं आगतम् । यदा महाभारतसमरे सर्वेषां कौरवाणां मृत्युरभवत् तदनन्तरं महात्मा विदुरः जन्माध–धृतराष्ट्रं वैराग्यविषयकोपदेशं प्रदत्तवान् । येन प्रभावेण तं प्रज्ञाचक्षुः उन्मीलयति । ततः धृतराष्ट्रः हिमालयं प्रति प्रयाणमकरोत् । शान्तरसदृष्ट्या विदुरस्योपदेशं द्रष्टव्यम् –

येन चैवाभिपन्नोऽयं प्राणैः प्रियतमैरपि ।

जनः सद्यो वियुज्येत किमुतान्यैर्धनादिभिः ॥[२]

कालस्य वशीभूतं सम्भूय जीवस्य प्रियतमानां प्राणानां सद्यः वियोगं भवति तर्हि धनादिविषये किं कथयेत् ?।

पितृभ्रातृसुहृत्पुत्रा हतास्ते विगतं वयः ।

आत्मा च जरया ग्रस्तः परगेहमुपाससे ॥[३]

---

[1] साहित्यदर्पणे ३/२४५–२४८

[2] श्रीमद्भागवते १/१३/२०

[3] श्रीमद्भागवते १/१३/२६

स्वबुद्ध्या परबुद्ध्या च यः अमुं संसारं दुःखरूपं मत्वा अस्मात् विरक्तं भवति तथा हरिं हृदये धृत्वा गृहात् प्रव्रजेत्, सः एव मनुष्येषु श्रेष्ठोत्तमः भवति ।

अत्र संसारसागरस्यासारताज्ञानमालम्बनमस्ति । विदुरः उद्दीपनम्, रोमाञ्चादयः अनुभावोऽस्ति । निर्वेदः, स्मृतिः इत्यादयः व्यभिचारिभावोऽस्ति ।

श्रीमद्भागवते वात्सल्यरसस्य वर्णनम्

आचार्यविश्वनाथेन वात्सल्यरसस्य सत्तां स्वीक्रियते । इमं रसं दशमरसरूपेण स्वग्रन्थे साहित्यदर्पणे स्थानं प्रदीयते । वात्सल्यरसस्य स्थायिभावः स्नेहः, वर्णः पद्मगर्भच्छविः अस्ति, अस्य देवता ब्राह्मीलोकमातरोऽस्ति । पुत्रीपुत्रादयः आलम्बनम्, तच्चेष्टा विद्याशौर्याभ्युदयपरिचर्यादयः उद्दीपनम्, आलिङ्गनाङ्गस्पर्शः शिरस्य चुम्बनं विलोकनं रोमाञ्चहर्षादयः अस्यानुभावः वर्तते । अनिष्टशंकाहर्षगर्वादयः संचारिभावोऽस्ति ।

स्फुटं चमत्कारितया वत्सलं च रसं विदुः ।

स्थायी वत्सलतास्नेहः, पुत्राद्यालम्बनं मतम् ॥

उद्दीपानि तच्चेष्टा विद्याशौर्यादयादयः ।

आलिङ्गनाङ्गसम्स्पर्शशिरश्चुम्बनमीक्षणम् ॥

पुलकानन्दबाष्पाद्या अनुभावाः प्रकीर्तिताः ।

सञ्चारिणोऽनिष्टशङ्काहर्षगर्वादयो मताः ॥

पद्मगर्भच्छविवर्णो दैवतं लोकमातरः ।[१]

---

[1] साहित्यदर्पणः ३/२५१-२५३

श्रीमद्भागवते अस्य रसस्य वर्णनं प्रचुरमात्रेण समुपलभ्यते । यशोदायाः कृष्णं प्रति यत्स्नेहं वात्सल्यं च अस्ति तत्रैव वात्सल्यरसस्योद्भावकः संजायते । एकस्मिन् समये कृष्णबलरामौ ग्वालबालैः सह क्रीडां अकुर्वताम् तदा माता यशोदा आह्वयति, द्वौ बालकौ दृष्ट्वा यशोदाहृदये वात्सल्यभावं उत्पन्नं जातम् । तस्मात् कारणात् यशोदायाः स्तनयोः दुग्धं प्रवाहयति तदा उच्चस्वरेण कृष्णं आह्वयति । कृष्ण अत्रागच्छतु क्रीडां कृत्वा श्रान्तः जातः मम पार्श्वे आगत्य मम दुग्धपानं कुरु –

नोपेयातां यदाऽऽहूतौ क्रीडासङ्गेन पुत्रकौ ।
यशोदां प्रेषयामास रोहिणी पुत्रवत्सलाम् ॥
क्रीडन्तं सा सुतं बालैरतिवेलं सहाग्रजम् ।
यशोदाजोहवीत् कृष्णं पुत्रस्नेहस्नुतस्तनी ॥
कृष्ण कृष्णारविन्दाक्ष तात एहि स्तनं पिब ।
अलं विहारैः क्षुत्क्षान्तः क्रीडाश्रान्तोऽसि पुत्रक ॥[1]

अत्र आलम्बनं कृष्णबलरामौ, उद्दीपनं द्वयोः बालकयोः क्रीडाचेष्टादयः, अनुभावः मातुः मनानुकूलप्रसन्नतोत्सुकता च । सञ्चारिभावः हर्षगर्वावेशश्च । स्थायिभावः वात्सल्यस्नेहोऽस्ति ।

श्रीमद्भागवते भक्तिरसस्य वर्णनम्

रससंख्याविषये तु आद्यतः अद्यावधि पर्यन्तं मतभेदं दृश्यते । रूपगोस्वामिपादेन “भक्तिरसामृतसिन्धु” इत्यस्य नामकस्य भक्तिरसप्रतिपादिकः

---

[1] श्रीमद्भागवते १०/११/१३–१५

रसशास्त्रीयः प्रौढग्रन्थः विरचितः । ग्रन्थेऽस्मिन् भक्तिरसं मुख्यरसं मत्वा सर्वेषां रसानां समावेशः भक्तिरसे एव कृतोऽस्ति । तेन गोस्वामिपादेन शृङ्गारकरुणहास्यरौद्रादिरसानां भक्तिरसस्यैव प्रभेदः स्वीक्रियते । अनेन प्रकारेण प्राचीनालङ्कारिकाणां रससिद्धान्तस्य यथावत् स्वीकुर्वन् स्वमौलिकताप्रतिभायाः भक्तिरसे संसिक्तं कृतम् । रूपगोस्वामिमहाभागेन निगदितम् यत् –

सामग्री परिपोषेण परमा रसरूपता ।
विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिणः ॥
स्वाद्यत्वं हृदि भक्तानामानीता श्रवणादिभिः ।
एषा कृष्णरतिः स्थायिभावो भक्ति रसो भवेत् ॥[१]

विभावानुभावव्यभिचारिभावैः श्रवणादिसहाय्येन भक्तानां हृदयपटलेषु आस्वाद्यत्त्वं सम्प्राप्तभगवद्भक्तिः स्थायिभावः कथ्यते ।

प्राचीनालङ्कारैः भरतमुनिना कथितरसान् स्वीकृतकारणात् भक्तिं भावरूपेण अभिमन्यते । किन्तु रसेष्वस्य रसस्य गणना प्रचीनाचार्यैः नैव कृता ।

रूपगोस्वामिमहाभागेन भक्तिरसस्य मुख्यरूपेण पञ्चभेदाः अमुख्यरूपेण सप्त भेदाः कृताः । द्वादशभेदानां विवेचनं महाभागेन स्वग्रन्थे एव निगदितम् । मुख्यभक्तिरसः – शान्तभक्तिरसः, प्रीतिभक्तिरसः, प्रेयोभक्तिरसः, वत्सलभक्तिरसः, मधुरभक्तिरसश्च, । अमुख्यभक्तिरसस्य भेदाः – हास्यभक्तिरसः, अद्भुतभक्तिरसः, वीरभक्तिरसः, करुणभक्तिरसः, करुणभक्तिरसः, रौद्रभक्तिरसः, भयानकभक्तिरसः, बीभत्सभक्तिरसश्च । अनेन भक्तिरसानां श्रीमद्भागवते एव वर्णनं समुपलभ्यते नान्यः।

---

[1] भक्तिरसामृतसिन्धुः, दक्षिणविभाग, लहरी १, श्लोक ५–६

श्लोकेऽस्मिन् करुणरसं विहाय सर्वेषां रसानां वर्णनं वर्तते । यदा मथुरानगर्यां कृष्णवलरामौ कंसस्य राज्ये मल्लयुद्धे रङ्गमञ्चं प्रति गतवन्तौ तदा तत्र विद्यमानाः जनाः कृष्णवलरामौ दृष्ट्वा तौ प्रति स्वस्वमनोभावं प्रकटयन्ति ।

मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान्,
गोपानां स्वजनोऽसतां क्षितिभुजां शास्त स्वपित्रोः शिशुः ।
मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनां,
वृष्णीनां परदेवतेति विदितो रङ्गं गतः साग्रजः ॥[१]

कृष्णः अग्रजेन सह रङ्गशालायां प्रविशति तदा मल्लान् वज्रवत्, पुरुषान् नरश्रेष्ठवत्, स्त्रियः मूर्तिमान् कामदेववत्, गोपान् बन्धुवत्, दुष्टान् राज्ञः नियन्तावत्, पितरौ स्वपुत्रवत्, कंसं मृत्युवत्, अविदुषः विराट, योगिनः परमतत्त्वम् तथा यादवान् देववत् कृष्णः दृश्यते । अत्र दश रसानां वर्णनं सम्प्राप्यते । क्रमशः रौद्र-अद्भुत्-शृंगार-हास्य-वीर-वात्सल्य-भयानक-वीभत्स-शान्त-भक्तिश्च एषां रसानां सन्निवेशः अस्मिन् श्लोके भवति स्म ।

श्रीमद्भागवतमहापुराणम् भक्तिप्रधानग्रन्थो वर्तते । अस्मिन् सर्वेषां भक्तिरसानां वर्णनं समुपलब्धं जातम् । रसदृष्ट्या श्रीमद्भागवतस्य काव्यमूल्यम् सर्वाधिकमस्ति ।

### (घ) श्रीमद्भागवते अलङ्कारविषयकवर्णनम्

काव्यशास्त्रस्य पक्षद्वयं वर्तते कलापक्षः भावपक्षश्च । यथा मनुष्यस्य वाह्याभ्यान्तररूपेण भेदद्वयं प्रतीयते । प्रथमं शरीरं द्वितीयं च आत्मा । यथा शरीरस्य

[1] श्रीमद्भागवते १०/४३/१७

बाह्यरूपेण शोभाधायकाः कटककुण्डलानि सन्ति । आभ्यान्तररूपेण विविधगुणभूषितानि शरीराणि भवन्ति । तथैव काव्यशरीरस्य आलङ्कारादितत्त्वानि काव्यव्यप्रयोजकानि भवन्ति । काव्यवृत्तेस्तदाश्रयात् इति ध्वनिकारेणोक्तमपि रसगुणादिकृतचारुत्वेनैव शब्दार्थयोः काव्यत्वनिर्वाहादिति । अनेन काव्यशास्त्रे काव्यस्वरूपरसदोषगुणरीति–अलङ्काराणामपि महद्वैशिष्ट्यं प्रसिद्धमिति ।

अलङ्कारशास्त्रस्य प्रथमो ग्रन्थः भामहप्रणीतः काव्यालंकारः वर्तते । ततः परं दण्डीभट्टोद्भटरुद्रटवामनादयः अलंकारशास्त्रनिर्मातारः अभूवन् । काव्यशास्त्रस्य पर्यायशब्दाः साहित्यशास्त्रम्–सौन्दर्यशास्त्रम्–क्रियाविधि–क्रियाकल्पश्चेत्यादयः अभिधीयते । अस्य शास्त्रस्य ग्रन्थानामनुशीलेनायं अवगतो भवति यत् अनेके सम्प्रदायाः आसन् । काव्यकर्तृभिः स्वस्वबुद्ध्यानुसारेण नानाविधरूपेण पर्यालोच्य अलंकारविषये स्वमतं प्रदर्शितम् । अत्र इदमपि अवधेयम् "रमणीयौ शब्दार्थौ काव्यनाम्ना व्यपदिश्यते" शब्दार्थयोः रमणीयता च धर्ममुखेन यदुच्यते तदा गुणालंकारश्च इति द्वौ तादृशौ धर्मौ सम्भवतः ।

प्रारम्भकाले भरतभामहवेव मुख्याचार्यौ प्राप्येते । ततः आचार्यमम्मटस्त्वलंकारशास्त्रसंसारे अवतारत्वेन कल्प्यते । काव्ये अलंकारस्य किं स्थानम् ? तदुच्यते भामहेन –

रूपकादिरलंकारस्तथान्यैर्बहुधोधोदितः ।
न कान्तमपि निर्भूषं विभाति वनिताननम् ।[१]
न नितान्तादिमात्रेणा जायते चारुता गिराम् ।
वक्राभिधेयशब्दोक्तिरिष्टा वाचामलङ्कृतिः ॥[२]

[1] काव्यालंकारे १/१३
[2] काव्यालंकारे १/३६

वाचां वक्रार्थशब्दोक्तिरलङ्काराय कल्पते ।[1]

अनेन ज्ञायते अलंकारान् विना काव्ये सौन्दर्योत्पादनं शोभाविधानं प्रभावोत्पादनं अभिव्यञ्जना वैचित्र्यं चमत्कारसंयोजनं स्पष्टभावावबोधनं बिम्बग्रहणं चित्रसंयोजनं रसोपकरणं च न कर्तुं शक्यते ।

एवंप्रकारेण संचिन्त्यैव काव्यकारैः पुराणकारैश्च स्वरचनायां विविधालंकाराणां प्रयोगः कृतः । श्रीमद्भागवते अनेकविधालंकारयोजना संदृष्टा वर्तते । तत्र उभयविधालंकाराणां (शब्दार्थालंकाराणां अर्थालंकाराणां च) प्रयोगः अनेकेषु स्थलेषु दरीदृश्यते । अत्र शब्दालंकाराणामुदाहरणानि भागवताश्रितानि उपस्थापितानि ।

शब्दालंकारस्य संख्या षडेव स्वीकृता । काव्यप्रकाशटीकाकारेण सोमेश्वरेण निगद्यते यत् –

वक्रोक्तिरप्यनुप्रासो यमकं श्लेषचित्रके ।
पुनरुक्तवदाभासः शब्दालङ्कृतयस्तु षट् ॥

अलङ्कारसर्वस्वस्य टीकाकर्त्रा समुद्रबन्धनेन चोक्तं –

इह विशिष्टौ शब्दार्थौ काव्यम् ॥

तयोः वैशिष्ट्यं धर्ममुखेन, व्यापारमुखेन, व्यंग्यमुखेन च त्रयो पक्षाः समुदिताः । प्रथेमेहि अलङ्कारतः गुणतः वेति द्वैविद्यम् । द्वितीयेऽपि भणतिवैचित्र्येन भोगकृतत्त्वेन वेति द्वैविध्यम् । अत्रेदं विचार्यते रमणीयौ शब्दार्थौ काव्यनाम्ना व्यवह्रियते । शब्दार्थयोः रमणीयता च यद्यपि धर्ममुखेन यदुच्यते तदा गुणाः अलङ्कारश्चेति द्वौ समानौ धर्मौ सम्भवतः । तत्रापि गुणकृतवैशिष्ट्यवादिनौ

---

[1] काव्यालंकारे ५/६६

दण्डिवामनौ काव्यस्य जीवनाधायकं गुणं स्वीक्रियते । अलङ्कृतं वैशिष्ट्यं स्वीकार्यमाणाः उद्भटादयश्च अन्येऽपि अलङ्कारान् काव्यजीवनाधयकान् स्वीकुर्वन्ति । अत्र शब्दार्थयोः रमणीयता तद्व्यापारद्वारा स्वीक्रियते तत्रापि व्यापारो द्विविधः भणति वैचित्र्यमूलः भोगकृत्यमूलश्च । अत्र कुन्तकादयः वक्रोक्तिकाव्यजीवितं इति मन्यन्ते । भोगकृत्यमूलवैशिष्ट्यं भट्टनायकादयः स्वीक्रियन्ते ।

अग्रे क्षेमेन्द्रमहाभागेन ध्वनिमतं रसस्यैव विकसितं स्वरूपं स्वीकृतम् । अत्र अलङ्काराणां स्वरूपविषयकं विवेचनं पीयूषवर्षेणापि निगदितम् ट्ट

अङ्गीकरोति यः काव्यं शदार्थवनङ्कृती ।

असौ अ मन्यते कस्मात् अनुष्णमनलङ्कृती ॥[१]

अलङ्काराणां शब्दार्थभेदेन स्वरूपं सर्वैः स्वीक्रियते । अत्र प्रथमेहि शब्दालङ्काराणां विमर्शः उपस्थाप्यते । शब्दैः यः अलङ्कारः काव्यस्य शोभाधायकः भवति तदेव शब्दालङ्कारः कथ्यते । यथा अनुप्रास, उपमा, यमक, श्लेषादयः । अनुप्रासालङ्कारस्य परिभाषा काव्यप्रकाशे आचार्यमम्मटेन निगद्यते–

वर्णसाम्यमनुप्रासः[२]

यत्र वर्णसाम्यं भवति तत्र अनुप्रासालङ्कारः भवति, तथा यत्र व्यञ्जनानि समानानि स्युः तथापि स्वरवैषम्येऽपि अनुप्रासो भवति । काव्यशास्त्रिभिः अनुप्रासस्य मूलरूपेण भेदद्वयं स्वीकृतम्– छेकानुप्रासः वृत्यनुप्रासश्च । श्रीमद्भागवते द्वयोः भेदयोः उदाहरणानि सम्प्राप्तानि सन्ति । प्रथमेहि छेकानुप्रासस्योदाहरणं प्रस्तूयते –

---

[1] चन्द्रालोके १/८

[2] काव्यप्रकाशे ९/१०४

छेकानुप्रासः – यत्र अनेकव्यञ्जनानां साम्यता सकृत्बारं भवति तत्र छेकानुप्रासालङ्कारो भवति । श्रीमद्भागवतेऽनेकेषु स्थलेषु उदाहरणानि समधिगतानि । यथा श्रीमद्भागवतस्य प्रथमस्कन्धस्य अष्टमेऽध्याये छेकानुप्रासस्योदाह्रियते –

गोविन्द गोद्विज सुरार्तिहरावतार

योगेश्वराखिलगुरो भगवन्नमस्ते ।[1]

अत्र गो गो आदि शब्दैः छेकानुप्रासः भवति । तथैव वृत्यनुप्रासस्यापि उदाहरणं प्राप्यते ।

वृत्यनुप्रासः – यत्र अनेकवर्णानां असकृत्बारं सादृश्यं भवति तत्र वृत्यनुप्रासः जायते । यथा – भागवतकारेण अनेकेषु स्थलेषु मार्मिकं चित्रणं विह्वलावस्थया कृतं तत्र उच्चारणसादृश्यस्य चमत्कृतिः दरीदृश्यते । यथा – पञ्चमस्कन्धस्य एकोनविंशतितमेऽध्याये अष्टमे श्लोके वृत्यनुप्रासस्य उदाहरणं प्रस्तूयते –

सुरोऽसुरो वाप्यथ वानरो नरः

सर्वात्मना यः सुकृतज्ञमुत्तमम् ।

भजेत रामं मनुजाकृतिं हरिं

य उत्तराननयत्कोसलान्दिवमिति ॥[2]

अत्र सुरः सुरः नरः नरः शब्दयोश्च वृत्यनुप्रासः भवति । अन्यत्रापि श्रीकृष्णस्य पुत्रनामसु अपि अस्योदाहरणं प्राप्यते –

भानुः सुभानुः स्वर्भानुः प्रभानुर्भानुमांस्तथा ।

चन्द्रभानुर्बृहद्भानुरतिभानुस्तथाष्टमः ॥

---

[1] श्रीमद्भागवते १/८/४३

[2] श्रीमद्भागवते ५/१९/८

श्रीभानुः प्रतिभानुश्च सत्यभामात्मजा दश ।
सा‍म्बः सुमित्रः पुरुजिच्छितजिच्च सहस्रजित् ॥[१]

अत्र ग्रन्थकारेण वर्णध्वनिना अनुप्रासालङ्कारेण माधुर्यवृद्धिः कृता । श्लोकेऽस्मिन् नवाधिकबारं भानुशब्दस्य प्रयोगेण चमत्कृतिः दृश्यते । अन्यस्मिन् स्थले गोपिकाभिः विरहावस्थायां यदा कृष्णं प्रति भावं प्रकटितं गीतेन तदा कोमलकान्तपदावली दृष्टव्या –

प्रहसितं प्रियं प्रेमवीक्षणं विहरणं च ते ध्यानमङ्गलम् ।
रहसि संविदो या हृदिस्पृशः कुहक नो मनः क्षोभयन्ति हि ॥[२]

एवंप्रकारेण भागवतकारेण स्वामररचनायां अनुप्रासस्य विशिष्टा योजना निबद्धा वर्तते । अनेकानि उदाहरणानि गोपीगीतवेणुगीतादिषु सम्प्राप्तानि भवन्ति ।

उपमालङ्कारः

उपमालङ्कारः सर्वेषां अलङ्काराणां वरिष्ठतमः प्राचीनतमश्चालङ्कारः विद्यते । यतोहि जगतितले यस्य कस्यापि सौन्दर्यस्य भावं दृष्टिपथं आयाति उपमालङ्कारेणैव सर्वैः वर्णनं विहितम् । अस्य अलङ्कारस्य निरूपणं सूक्ष्मेक्षिकया भेदोपभेदसहितं प्रकटितम् । अत्र काव्यशास्त्रेषु काव्यविद्भिः उपमालङ्कारस्य परिभाषा निर्दिष्टा । तद्यथा–

साधर्म्यमुपमा भेदे ।[३]

उपमाविषये अनेकैः काव्यशास्त्रिभिः मतैक्यं नास्ति । यतोहि संख्याविषये विमतं प्राप्यते । उपमायाः अनेकभेदाः सन्ति किन्तु प्राधान्येन अस्या भेदद्वयं वर्तते

[1] श्रीमद्भागवते १०/६१/१०–११
[2] श्रीमद्भागवते १०/३१/१०
[3] काव्यप्रकाशः १०/१२५

। यथा – पूर्णोपमा लुप्तोपमा चेति । उपमालङ्कारस्य अनेके भेदाः विश्वनाथेन मम्मटेन पण्डितराजजगन्नाथेन च स्वीकृताः । अत्र द्वित्रिभिः उदाहरणैः दृष्टव्यः ।

पूर्णोपमा लुप्तोपमा च –

पूर्णोपमायां चत्वारि तत्त्वानि भवन्ति उपमेयः उपमानं साधारणधर्मः उपमानवाचकशब्दश्च । यत्र एतेषां उपस्थितिः तत्र पूर्णोपमा । यत्र द्वित्रियादीनां तत्र लुप्तोपमा । यत्र एकोपमेयस्य कारणेन अनेकानि उपमानानि भवन्ति तत्र मालोपमा भवन्ति ।

पूर्णोपमालङ्कारः –

अत्र क्रमेण प्रथमेहि पूर्णोपमाया उदाह्रियते । कुन्ती वचनमस्ति यत् –

केचिदाहुरजं जातं पुण्यश्लोकस्य कीर्तये ।
यदोः प्रियस्यान्ववाये मलयस्येव चन्दनम् ॥[1]

अत्र पूर्णोपमा दृश्यते यतोहि राज्ञः यदोः उपमा मलयाचलपर्वतेन सह क्रियते । तथैव भगवतः उपमा चन्दनेन सह क्रियते । अनेन कारणेन पूर्णोपमा अत्र भवति ।

लुप्तोपमालाङ्कारः –

तथैव लुप्तोपमा उदाहरणम् । श्रीमद्भागवतस्य प्रथमस्कन्धस्य नवमेऽध्याये ग्रन्थकारेण भगवतः श्रीकृष्णस्य अनेकविधरूपं वर्णितम् । यथा – सूर्यः अनेकचक्षुभिः दृश्यते तथैव श्रीकृष्णस्य वर्णनं प्राप्यते –

तमिममहमजं शरीरभाजां

[1] श्रीमद्भागवते १/८/३२

हृदि हृदि धिष्ठितमात्मकल्पितानाम् ।

प्रतिदृशमिव नैकधार्कमेकं

समधिगतोऽस्मि विधूतभेदमोहः ॥[१]

अत्र तत्त्वमेकं अवशेषं अन्यानि तत्त्वानि सन्निहितानि । अनेन कारणेन लुप्तोपमा भवन्ति ।

मालोपमालङ्कारः –

मालोपमा यदेकस्योपमानं बहु दृश्यते ।[२]

यथोक्तं पूर्वम् उपमेयस्य अनेकानि उपमानानि भवन्ति तत्र मालोपमालङ्कारः भवति । भागवतस्य दशमस्कन्धस्य सप्तचत्वारिंशतितमेऽध्याये उदाहरणं प्राप्यते –

निःस्वं त्यजन्ति गणिका अकल्पं नृपतिं प्रजाः ।

अधीतविद्या आचार्यं ऋत्विजो दत्तदक्षिणम् ॥

खगा वीतफलं वृक्षं भुक्त्वा चातिथयो गृहम् ।

दग्धं मृगास्तथारण्यं जारो भुक्त्वा रतां स्त्रियम् ॥[३]

अत्र उपमेयस्य अनेकानि उपमानानि वर्णितानि ग्रन्थकारेण ।

यमकालङ्कारः –

काव्यविद्भिः यमकालङ्कारस्य विषये निर्दिष्टं यत् –

अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः ।[४]

---

1 श्रीमद्भागवते १/९/४२

2 साहित्यदर्पणः १०\२६

3 श्रीमद्भागवते १०/४७/७-८

4 काव्यप्रकाशः ९/११७

इति मम्मटेनोक्तं यत्र भिन्नवर्णसमुदायस्य निरर्थकं सार्थकं वा क्रमशः आवृत्तिः अथवा पौनःपुण्येन श्रवणं पठनं वा भवति तत्र यमकालङ्कारः जायते । अस्याभिप्रायः यत्र द्वयोः शब्दयोः युग्मस्य आवृत्तिकारणेन यमकस्योद्भवः भवति । श्रीमद्भागवतस्य दशमस्कन्धस्य द्वादशोऽध्याये वर्णितं यत् –

धराधरोष्ठो जलदोत्तरोष्ठो
दर्याननान्तो गिरिशृङ्गदंष्ट्रः ।
ध्वान्तान्तरास्यो विततध्वजिह्वः
परुषानिलश्वासदवेक्षणोष्णः ॥[1]

अत्र धर–धर–शब्दस्य ओष्ठ–ओष्ठ–शब्दस्य च क्रमेण आवृत्तिः दृश्यते । अनेन अत्र यमकालङ्कारः प्रयुक्तः ।

अर्थालङ्काराणामुदाहरणानि

काव्यस्य सौन्दर्यं शब्दार्थयोः आधारभूतं भवति । शब्दार्थानां आधारः अलङ्कारः भवति । अलङ्कारस्याधारः सौन्दर्यं भवति कवचकुण्डलानिवत् यथोक्तं विश्वनाथेन । अत्र अलङ्काराणां उदाहरणानि प्रस्तूयते । वस्तुतः अलङ्काराणां त्रयः विभागाः केचिद् स्वीक्रियन्ते । शब्दालङ्कारः अर्थालङ्कारः उभयालङ्कारश्चेति शब्दालङ्काराणां श्रीमद्भागवते यत्र तत्र वर्णनं प्राप्यते तदोदाहृतम् । अत्र अर्थालङ्काराणां उदाहरणानि प्रस्तुतानि

अर्थालङ्कारः –

यत्र काव्येषु पद्येषु व स्वबाह्यस्वरूपेण सौन्दर्यबर्धनं कुर्वन्ति तेषां शब्दानां वैचित्यं जायते । यत्र पद्येषु काव्येषु वा भावसौन्दर्यस्य बुद्धिः क्रियते तत्र

[1] श्रीमद्भागवते १०/१२/१७

अर्थालङ्कारः भवति । यत्रोभयपक्षयोः सौन्दर्यवर्धनं भवति तत्र तृतीयो भेदः भवति । अर्थालङ्कारेषु बहवः अलङ्काराः गण्यते । यथा – उपमा, श्लेषः, रूपकं, दीपकं, व्यतिरेकं, उत्प्रेक्षा, अर्थान्तरन्यासः, स्वभावोक्तिः, संसृष्टिः, हेतु, सन्देशः इत्यादयः ।

श्रीमद्भागवते प्राधान्येन प्रयुक्तालङ्काराणां विवेचनं अत्र क्रियते । उपमालङ्कारस्य विवरणं शब्दालङ्कारप्रसङ्गे उपस्थापितम् । तथाप्यत्र अर्थदृष्ट्या दिङ्मात्रेण उदाह्रियते ।

रूपकालङ्कारः –

रूपकालङ्कारः अत्यन्तसादृश्यकारणेन उपमावदेव भवति । अस्यार्थः अस्ति रूपमिति आरोपः अत्र उपमेय उपमाने वा अत्यन्तं सादृश्यं स्यात् तद्रूपको भवति । अस्य लक्षणमिदं वर्तते –

तद्रूपकमभेदो य उपमानोपमेययोः ।[१]

यत्र स्वरूपं दृष्ट्या उपमानम् उपमेयं तेन सह अभेदस्थापको रूपको भवति । अत्र एतदपि ध्यातव्यं यदपह्नुतिः, उत्प्रेक्षा, भ्रान्तिमान, अतिशयोक्तिः, निदर्शनादि अलङ्कारेषु अनेन उपमेये उपमानस्यारोपः भवति । अनेन कारणेन रूपकस्य लक्षणे अतिव्याप्तिः न कर्तव्या । उपमेयस्य असाधारणधर्ममुख्यत्त्वेन स्वीक्रियते । यथा चन्द्रमुखं अत्र उपमेयमुखे उपमानचन्द्रस्य एकरूपता (अभेदः) रूपकं एव कथयति । अत्र विशेषरूपेण सम्भावना उत्प्रेक्षा अपह्नुतिः इत्यादीनां निवारणं अनेन लक्षणेन कर्तुं शक्यते । रूपकस्य भेदत्रयं वर्तते, स (१) अवयवरूपकं (२) निरवयवरूपकं (३) परम्परितरूपकञ्चेति ।

---

[1] काव्यप्रकाशे १०/१३९

भागवतकारेण प्रायेण रूपकस्य त्रयाणां भेदानां वर्णनं अनेकेषु पद्येषु प्रयोगः कृतः । अत्र उदाहरणैः व्याख्यायते –

श्रीमद्भागवते रूपकस्य योजना असौन्दर्यस्याभियोजना च मनोभावैः भावसाहचर्यैः च सिद्धिः प्राप्यते । प्रथमस्कन्धस्य प्रथमेऽध्याये महर्षिणा भागवतमहापुराणस्य वर्णनं रसरूपत्वेन क्रियते । रसः कीदृशमस्ति ? अस्य विवेचनं कृतम् । अत्र साङ्गरूपकालङ्कारस्य योजना विहिता । यथा – निगमे (वेदे) कल्पवृक्षस्य. शुकदेवे शुकस्य, कृष्णकथायां फलस्य, उत्वा श्रीमद्भागवते फलस्य रसस्यारोपः क्रियते –

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥[१]

तथैव पञ्चमस्कन्धे त्रयोदशोऽध्याये नैके श्लोकाः रूपकारोपिताः सन्ति । तद्यथा –

दुरत्ययेऽध्वन्यजया निवेशितो
रजस्तमः सत्त्वविभक्तकर्मदृक् ।
स एष सार्थोऽर्थपरः परिभ्रमन्
भवाटवीं याति न शर्म विन्दति ॥[२]

श्लोकेऽस्मिन् रूपकस्यातिरोचकतया वर्णनं कृतम् । अत्र संसारं अटवेः रूपकम्, जीवसमूहं व्यवसायस्य रूपकम्, कामक्रोधमोहलोभद्वेषान् जीवात्मनः ज्ञानधनान् वञ्चनजनानां रूपकं प्रदीयते । उक्तपदेन भागवतकारेण साङ्गरूपकस्य योजना सम्यक्तया प्रतिपादिता ।

---

[1] श्रीमद्भागवते १/१/३
[2] श्रीमद्भागवते ५/१३/१

इत्थं राजा धर्मसुतो मनोरथमहार्णवम् ।

सुदुस्तरं समुत्तीर्य कृष्णेनासीद् गतज्वरः ॥[१]

श्लोकेऽस्मिन् मनोरथोपमेयोपरि महार्णवस्यारोपस्य कारणेन रूपकालङ्कारः अस्ति । भागवतकारेण अन्यापि साङ्गरूपके जीवात्मा शरीरं परमात्मा च तस्य प्राप्तिर्साधनं क्रमेण रथी रथः, धनुषः इषुः लक्षस्य रूपे वर्णितमस्ति –

आहुः शरीरं रथमिन्द्रियाणि

हयानभीषून् मन इन्द्रियेशम् ।

वर्त्मानि मात्रा धिषणां च सूतं

सत्त्वं बृहद् बन्धुरमीशसृष्टम् ॥

अक्षं दशप्राणमधर्मधर्मौ

चक्रेऽभिमानं रथिनं च जीवम् ।

धनुर्हि तस्य प्रणवं पठन्ति

शरं तु जीवं परमेव लक्ष्यम् ॥[२]

अत्र शरीरे रथस्य इन्द्रियेषु अश्वानाम्, मनसि अभिषूनः, शब्दादिषु विषयमर्गस्य, बुद्धौ सारथेः , चित्ते रज्वोः, दशप्राणेषु धुरेः धर्माधर्मयोः चक्राणाम्, जीवे रथेः, ओंकारे धनुषस्य, जीवात्मनि इषोः, परमात्मनि लक्षस्यारोपयति । अनेन प्रकारेण अत्र रूपकमाध्यमेन शरीरात्मेन्द्रियमनः परमात्मादीनां सम्बंद्धानां दार्शनिकविवेचनमत्र प्रस्तुतं कृतम् । कविः दर्शने काव्यतत्त्वानां नियोजियत्स्व भावानतिशयचमत्कारपूर्णं निर्माति ।

---

[1] श्रीमद्भागवते १०/७५/३०

[2] श्रीमद्भागवते ७/१५/४१–४२

उत्प्रेक्षालङ्कारः

उत्प्रेक्षालङ्कारः कवीनां प्रियोऽलङ्कारः वर्तते । उपमा पश्चात् सर्वाधिकरूपेण उत्प्रेक्षालङ्कारस्य प्रयोगः कृतः महाकविभिः । भामहतः पण्डितराजपर्यन्तं उप्रेक्षालङ्कारं सर्वातिधायिरूपेण सर्वैः स्वीकृतमिति । केशवमिश्रेण इदमपि उक्तं यत् "अलङ्कारसर्वस्वः इति उत्प्रेक्षा" ।

उत्प्रेक्षा शब्दस्यार्थः उत्कृष्टरूपेण सङ्कल्पना इति । यत्र उपमेये उपमानस्य सम्भावनानां वर्णनं भवति तत्रोत्प्रेक्षालङ्कारः भवति । मम्मटेनोक्तं यत् –

सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् ।[१]

श्रीमद्भागवतकारेण भक्ति – दर्शन – ज्ञानसम्बन्धितथ्यानां वर्णनं उत्प्रेक्षामाध्यमेन वर्णितमिति । अस्य अलङ्कारस्य प्रयोगः अनेकेषु स्कन्धेषु च प्राप्यते । यथा प्रथमस्कन्धस्य एकादशाध्यायस्य द्वितीयश्लोके वैयासकिः वक्ति । यथा–

स उच्चकाशे धवलोदरो
दरोऽप्युरुक्रमस्याधरशोणशोणिमा ।
दाध्मायमानः करकञ्जसम्पुटे
यथाब्जखण्डे कलहंस उत्स्वनः ॥[२]

अत्र महर्षिः वर्णयति यद्भागवतः श्रीकृष्णस्य रक्तवर्णस्य ओष्ठस्पर्शं कृत्वा ननाद शङ्खवत् प्रतीयते । यथा रक्तपद्मेषु स्थित्वा राजहंसः मधुरं गायति । अत्र

[1] काव्यप्रकाशे १०/१३७
[2] श्रीमद्भागवते १/११/२

भगवतः हस्तकमलयोः रक्तकमलेन सह उत्प्रेक्षा क्रियते । शङ्खस्य राजहंसेन सह उत्प्रेक्षा भवति । अपिच दशमस्कन्धस्य पञ्चदशाध्याये यथा –

बलस्य लीलयोत्सृष्टखरदेह हता हताः ।
तालाश्चकम्पिरे सर्वे महावातेरिता इव ॥[१]

अत्र वायुप्रकम्पेन क्रियोत्प्रेक्षालङ्कारः कथयति कविः । काव्यजगति उत्प्रेक्षालङ्कारस्य एते शब्दाः प्रसिद्धाः सन्ति –

मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः ।
उत्प्रेक्षा व्यञ्जते  शब्दैः इव शब्दोऽपि तादृशः ॥[२]

श्रीमद्भागवते उपर्युक्तशब्दानाम् अपि आधारेण महर्षिव्यासेन वर्णनं कृतम् । प्रथमस्कन्धस्याष्टमेऽध्याये –

मन्ये त्वां कालमीशानमनादिनिधनं विभुम् ।
समं चरन्तं सर्वत्र भूतानां यन्मिथः कलिः ॥[३]

अत्र देवीकुन्ती भगवति कृष्णे व्यापकत्वादिगुणानां सम्भावना मन्ये क्रियापदेन करोति । तथैव सम्भावनारूपेण दशमस्कन्धस्य तृतीयेऽध्याये –

स एव स्वप्रकृत्येदं सृष्ट्वाग्रे त्रिगुणात्मकम् ।
तदनु त्वं ह्यप्रविष्टः प्रविष्ट इव भाव्यसे । [४]

अत्र दार्शनिकतथ्यानां उत्प्रेक्षालङ्कारमाध्यमेन मधुरा प्रस्तुतिः कृता ।

तत्रैव षोडशतमे श्लोके उत्प्रेक्षालङ्कारस्य इवधब्दमाध्यमेन उदाहरणं प्राप्यते –

---

[1] श्रीमद्भागवते  १०/१५/३४
[2] काव्यादर्शे   २/८
[3] श्रीमद्भागवते  १/८/२८
[4] श्रीमद्भागवते  १०/३/१४

सन्निपत्य समुत्पाद्य दृश्यन्तेऽनुगता इव ।

प्रागेव विद्यमानत्वान्न तेषामिह सम्भवः ॥[१]

अग्रे वराहावतारवर्णने भगवतः विग्रहस्य शोभावर्णनं उत्प्रेक्षालङ्कारमाध्यमेन महर्षिणा कृतमिति । यथा –

त्रयीमयं रूपमिदं च सौकरं

भूमण्डलेनाथ दता धृतेन ते ।

चकास्ति शृङ्गोढघनेन भूयसा

कुलाचलेन्द्रस्य यथैव विभ्रमः ॥[२]

एवंप्रकारेण महर्षिव्यासेन उत्प्रेक्षायाः साङ्गोपाङ्गप्रयोगः भागवते अनेकेषु स्थलेषु कृतः ।

समासोक्त्यलङ्कारः

समासोक्त्याः अर्थः संक्षेपेण उक्तिः अथवा समासेन उक्तिः समासोक्तिः । अस्मिन् विशेषाणानां समानरूपेण प्रस्तुतवस्तुनः वर्णनेन अप्रस्तुतधर्मस्य व्यवहारस्य व्यञ्जनायां सङ्क्षिप्तकथनं वर्णितं भवति । अर्थात् एकवर्णनेन द्वयं ज्ञानं भवति । इमा समासोक्तिः भवति । समासोक्त्यालङ्कारस्य परिभाषा प्रदत्ता –

समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः ।

व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः ॥[३]

अस्मिन् वाक्ये प्रस्तुताप्रस्तुतयोः समानरूपेणान्वितकार्येण लिङ्गविशेषणयोः बलेन अलङ्कारः भवति ।

---

1 श्रीमद्भागवते ३/१३/४१

2 श्रीमद्भागवते ३/१३/४१

3 साहित्यदर्पणे १०/५६

भागवते समासोक्ति–अलंकारस्योदाहरणं उद्ध्रीयते –

तदोडुराजः ककुभः करैर्मुखं
प्राच्या विलिम्पन्नरुणेन शन्तमैः ।
स चर्षणीनामुदगाच्छुचो मृजन् ।
प्रियः प्रियाया इव दीर्घदर्शनः ॥[1]

रासलीलाप्रसङ्गे भगवतः संकल्पं कृते सति चन्द्रदेवः प्राक्दिशः मुखमण्डलोपरि स्वशीतलकिरणरूपी करकमलैः लालिमायाः कुङ्कमकेशराङ्किताकरोति । यथा दीर्घकालान्तरं स्वप्राणप्रियां पत्नीं समीपमागत्य तस्य प्रियतमपतिः तस्यै प्रसन्नातायाः इत्थं करोति । इत्थंप्रकारेण चन्द्रदेवः उदयं भूत्वा न केवलं पूर्वदिशायाः अपितु संसारस्य सर्वेषां चराचरप्राणीनां सन्तापं यद् शरत्कालीन् प्रखरसूर्यविरणैः भवति तद्संतापं अपहरति ।

अत्र चन्द्रपूर्वदिशायाः करः मुखश्लिष्टश्च विशेषाणां महिष्य नायकनायिकयोः व्यवहारस्यारोपः करोति ।अतः समसोक्तिः अलङ्कारः भवति ।

अप्रस्तुतप्रशंसालङ्कारः

अप्रस्तुतप्रशंसालङ्कारः तत्र भवति यत्र अप्रस्तुतस्य कथनस्य प्रस्तुतस्य प्रतीतिर्भूतेन अप्रस्तुतालङ्कारः कथ्यते ।

श्रीमद्भागवतं चतुर्थस्कन्धस्य एकोनत्रिंशत्तमेऽध्याये अस्यालङ्कारस्य उदाहरणं सम्प्राप्यते –

क्षुद्रञ्चरं सुमनसां शरणे मिथित्वा
रक्तं षडङ्घ्रिगणसामसु लुब्धकर्णम् ।

[1] श्रीमद्भागवते १०/२९/२

भवान् विश्वस्यात्मास्ति, विश्वरूपमस्ति, न भवान् जन्म लब्धम् न कर्मेव करोति तथापि भवान् पशुपक्षी–चराचरमनुष्यादिषु ज्न्म लभते तथा तेषां योनिरूपां दिव्यकर्म अपि करोति । इयमेव भवल्लीलास्ति । अत्र एकस्मिन् पक्षे कथयति भवान् जन्म न लब्धम् न कर्म करोति तथा द्वितीयपक्षे भवान् जन्म लब्धं कर्म करोति अत्र विरोधाभासालङ्कारः जायते ।

श्रीमद्भागवते अलङ्कारस्य वर्णनमद्भुतं जातम् । अख्याने, स्तुत्यां, उपदेशे सर्वेषु प्रसङ्गेषु अलङ्कारस्य दिव्यता चतुर्दिक्षु प्रसरति ।

(ङ) श्रीमद्भागवते छन्दविषयकवर्णनम्

संस्कृतभाषा द्विविधा विद्यते –वैदिकी लौकिकी च । द्वयोरपि छन्दयोजना सन्निहिता वर्तते । अस्माकं वेदा लौकिकसंस्कृतस्य आधारग्रन्थाः छन्दोवद्धाश्च सन्ति । तेषां सम्यग्ज्ञानाय छन्दोज्ञानमावश्यकमस्ति । उक्तञ्च आचार्यकात्यायनेन –

योह वा अविदितार्षेयच्छन्दो दैवतविनियोगेन
ब्राह्मणेन मन्त्रेण याजयति वा अध्यापयति वा,
सस्थाणुं वर्च्छति, गर्तं वा पद्यते, प्रमीयते वा,
पापीयान् भवति, यातयाम्यान्यस्यच्छन्दांसि भवन्ति ।

छन्दो वेदाङ्गस्य प्रतिनिधिभूतो ग्रन्थस्तु पिङ्गलाचार्यकृतं “छन्दःसूत्रम्” वर्तते । छर् धातोः निष्पन्नं छन्दः इति आचार्ययास्केन प्रतिपादितम् । छन्दत्वन्नाम – छन्दांसि छादनात् इति । अन्यत्रापि प्राप्यते छन्दयति आह्लादयति इति छन्दः ।

छन्दशास्त्रस्य गुरुशिष्यपरम्परायाः भेदद्वयं वर्तते । प्रथमो भेदः भगवतः शिवस्य प्रथमशिष्यदेवराजेन्द्रात् प्रवर्तितोऽस्ति । द्वितीयपक्षः भगवतः शिवस्य पुत्रात् कार्तिकेयात् प्रवर्तितः । प्रथमसम्प्रदायस्य ज्ञानं पिङ्गलसूत्रस्य यादवप्रकाशनामक्या टीकया भवति अपिच द्वितीयसम्प्रदास्य उल्लेखः पं. युधिष्ठिरमीमांसकविरचित–वैदिकछन्दोमीमांसायां प्राप्यते ।

प्रथमा परम्परा –

छन्दोज्ञानमिदं भवाद् भगवतो लेभे सुराणां पति–
स्तस्माद् दुश्यवनस्ततः सुरगुरुर्माण्डव्य नामा ततः ।
माण्डव्यादपि सैतवस्तत ऋषिर्यास्कस्ततः पिङ्गल–
स्तस्येदं यशसा गुरोर्भुवि धृतं प्राप्याऽस्मदाद्यः कृतम् ॥[१]

द्वितीया परम्परा–

छन्दः शास्त्रमिदं पुरा त्रिनयनाल्लेभे गुहोऽनादितस्
तस्मात् प्राप सनत्कुमारमुनिस्तस्माद् गुरूणां गुरुः ।
तस्माद् देवपतिस्ततः फणिपतिस्तस्माच्च सत्पिङ्गल–
स्तच्छिष्यैर्बहुभिर्महात्मभिरथो मह्यां प्रतिष्ठापितम् ॥

शुक्लयजुर्वेदे छन्दसां गणना स्वरूपञ्च प्राप्यते –

गायत्री–त्रिष्टुब्–जगत्यनुष्टुप–पङ्क्त्या सह ।
वृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तुत्वा ।
द्विपदा याश्चतुष्पदास्त्रिपदा याश्च षट्पदाः ।
विच्छन्दा याश्च सच्छन्दाः सूचीभिः शम्यन्तुत्वा ॥[१]

---

[1] छन्दोमञ्जरीभूमिकायाम्

अथर्ववेदे सप्तछन्दसां मुख्यरूपत्त्वेनोल्लेखं समुपलब्धम् – द्र

सप्तच्छन्दांसि चतुरुत्तराण्यन्यस्मिन्न्यध्यर्पितानि ।[२]

ब्राह्मणग्रन्थ–ऋक्प्रातिशाख्य–सांख्यायनश्रौतसूत्र–सामवेदीयनिदानसूत्र – पिङ्गलच्छन्दःसूत्र–कात्यायनीयसर्वानुक्रमणीत्यादिषु ग्रन्थेषु छन्दःवर्णनं समजायत ।

छदि आवरणे इत्यस्य धातोः छन्दशब्दस्य निष्पत्तिर्भवति । मन्त्राणामावरणं छन्दोभिः क्रियते अनेन कारणेन अस्य नाम छन्दः इति कथ्यते । पाणिनीयशिक्षानुसारेण "छन्दः पादौ तु वेदस्य" अनयोक्त्याधारेण वेदानां पादाः छन्दोऽस्ति । चन्दते आह्लादयति इति छन्दः । भ्वादिगणीयपठितचदि धातोः औणादिके असुन् प्रत्ययकृते सति छन्दःशब्दः निष्पन्नो जातः । इदं छन्दः द्विविधं भवति –

१. वर्णिकछन्दः ।

२. मात्रिकछन्दश्च ।

वर्णिकछन्दः –

यस्मिन् छन्दे पादस्थानां वर्णानां संख्या परिगण्यते तच्छन्दः वर्णछन्दः इति अवज्ञायते । अर्थात् स्वराः व्यञ्जनानि च छन्दसि  वर्णनाम्ना व्यवह्रियते । यथा– उपेन्द्रवज्रा, वसन्ततिलका, वंशस्थश्चेत्यादयः ।

मात्रिकछन्दः –

यस्मिन् छन्दसि पादस्थवर्णानां मात्राः गण्यते तन्मात्रिकछन्दः भवत्येव । अर्थात् वर्णोच्चारणकाल एव मात्रा सा च लघुगुरुभेदात् द्विधा जाता । यथा–आर्या ।

---

[1] शुक्लयजुर्वेदे २३/३३–३४

[2] अथर्ववेदे ८/१/१९

छन्दःशास्त्रे अक्षराणां संख्या विनियमवृत्तानां मापनाय अष्टौ गणाः कल्पिताः सन्ति । यगणादिः त्रयाणां वर्णानां समूहः गणः इति कथ्यते । एवमाहत्य अष्टौ गणाः सन्ति । ते च "यमाताराजभानसलगा" य= यगणः, मा= मगणः, ता तगणः, र= रगणः, ज= जगणः, भ= भगणः, न= नगणः, स= सगणः, ल= लघुः, गा= गुरुः । वर्णानां मात्राज्ञानं "यमाता राजभानसलगाः" सूत्रस्थं गणबोधकम् आदिवर्णं स्वीकृत्य अग्रस्थयोः द्वयोः वर्णयोः मात्रा गण्यते ।

मस्त्रिगुरुस्त्रिलघुश्च नकारो भादिगुरुः पुनरादुलघुर्यः ।

जो गुरुमध्यगतो रलमध्यः सोऽन्तगुरुः कथितोऽन्तलघुस्तः ॥[१]

एतस्य स्वरूपं चक्रेणानेन ज्ञातुं शक्यते –

| गण–नाम | वर्णाः | मात्राः | विवेचनम् |
|---|---|---|---|
| य=यगणः | यमाता | ।ऽऽ | आदिलघुर्यः = यत्र आदिवर्णः लघुः शेषौ गुरू यगणः । |
| मा=मगणः | मातारा | ऽऽऽ | मस्त्रिगुरुः = यत्र त्रयः गुरुवर्णाः सः मगणः । |
| ता=तगणः | ताराज | ऽऽ। | अन्तलघुस्तः = यत्र अन्त्यलघुः भवति स तगणः । |
| र=रगणः | राजभा | ऽ।ऽ | रलमध्यः = यत्र मध्यलघुवर्णः सः रगणः । |
| ज=जगणः | जभान | ।ऽ। | जो गुरुमध्यगतो= यत्र मध्यवर्णःगुरुः शेषौ लघू सः रगणः । |
| भ=भगणः | भानस | ऽ।। | भादिगुरुः = यत्र आदिवर्णः गुरुः शेषौ लघू स भगणः । |
| न=नगणः | नसल | ।।। | त्रिलघुश्च नकारो = यत्र त्रयःलघुवर्णाः स नगणः । |
| स=सगणः | सलग | ।।ऽ | सोऽन्तगुरुः = यत्र अन्त्यवर्णः गुरुः शेषौ लघू सः सगणः । |

[1] छन्दोमञ्जरी १/८

छन्दःलक्षणे संख्यानां कृते प्रयुक्ताः पारिभाषिकशब्दाः –

| | | |
|---|---|---|
| १. | एकः | = चन्द्रमा, पृथिवी (चन्द्रः, एक एव पृथिवी च ) |
| २. | द्वौ | = पक्षः, नेत्रम् (शुक्लपक्षः कृष्णपक्षः द्वौ पक्षौ तथैव नेत्रम्) |
| ३. | त्रयः | = गुणः, आमः, अग्निः । |
| ४. | चत्वारः | = वेदाः, वर्णाः, उगाः, आश्रमाः । |
| ५. | पञ्च | = शरः, इन्द्रिय–भूत–तत्त्वानि । |
| ६. | षड् | = शास्त्रम्, रसः, ऋतवः । |
| ७. | सप्त | = अश्वः, मुनिः, लोकः, स्वरः । |
| ८. | अष्ट | = वसु, यमः, सिद्धिः, योगिनः । |
| ९. | नव | = अङ्कः, ग्रहः, द्रव्यम्, निधिः । |
| १०. | दश | = दिक्, अवताराः । |
| ११. | एकादश | = रुद्राः । |
| १२. | द्वादश | = सूर्यः, मासाः । |

वस्तुतः काव्याङ्गानामपेक्षया छन्दसां रसैः भावैर्वा सह साक्षात् सम्बन्धः विद्यते । यतोहि हृदयगतभावानां मनोविकाराणामभिव्यञ्जना वचनैः भवति । वचनानि च मनोविकारानुरूपाणि भवति । अस्माकं चित्तवृतिः यथा भवति तथैव वाणी निस्सरति, वाण्या इयं तरङ्गभङ्गिमा, यतिगत्या आरोहावरोहै इत्यादिभिः लयः उत्पद्यते । इयमेव लययुतायाः वाण्याः स्वरूपं छन्दः उच्यते ।

अनेन प्रकारेण छन्दसां अस्ति तावत् भावैः रसैर्वा साक्षात् सम्बन्धः । एतस्मादेव आचार्याः प्रत्येकं रसस्य कृते पृथक् पृथक् छन्दविधानं कृतवन्तः। यथा– शृङ्गार–शान्त–करुणादि अनुष्टुब्छन्दः । रसानां तत्त्वं विचिन्त्यैव वर्णने

महर्षिणा व्यासेन श्रीमद्भागवते भिन्न–भिन्न–भावानुरूपं रसानां कृते भिन्न–भिन्न–छन्दांसि प्रयुक्तानि ।

छन्दोभिः भावसम्प्रेषणे सहजातादेः समावेशो भवति । क्लिष्टातिक्लिष्टभावान् छन्दःमाध्यमेन सहजसंवेद्यरूपे अभिव्यक्तकर्तुं शक्यते । अनुष्टुब्छन्दः अत्यधिकलोकप्रियमस्ति । अस्य प्रयोगं कविभिः प्रत्येकरसानां भावानां अभिव्यक्तये प्रयुक्तं जातम् । सर्वेषां छन्दसां प्रयोगं भिन्नभिन्नप्रसङ्गेषु भिन्नभिन्नछन्दसां प्रयुक्तं जातम् । यथा–

युद्धवर्णने, सभासंवादे, गोष्ठिसंवादे, कथावस्तोः वर्णने वंशस्थछन्दसः व्यवहरति । प्रायेण प्रत्येककाव्यनिर्मातारः महाकाव्यस्य प्रारम्भे वंशस्थछन्दसः प्रयोगं कुर्वन्ति ।

समृद्धि–सुखं–शृङ्गार–विलास–मृदुलभावनादीनाञ्च पारस्परिक–मधुर–सम्बन्धानां वर्णने द्रुतविलम्बितछन्दः प्रयुज्यते । यद्यपि केषुचित् महाकाव्येषु पुष्पाचय–दोला–क्रीडादिवर्णनेऽपि अस्य प्रयोगं सञ्जातम् ।

वियोग–प्रवास–विपत्ति–वर्षा–मनोव्यथा विस्मृत्यादीनाञ्च चित्रणे मन्दाक्रान्ताछन्दसः प्रयोगं भवति । सन्देशकाव्यस्य दूतकाव्यस्य च कृतेऽपि इदं छन्दः सर्वोत्तमं मन्यते ।

मालिनी छन्दः प्रायेण सर्गान्ते प्राप्नोति । कस्यापि कार्यस्य सिद्धिः निर्विघ्नपूर्वकं भवेदित्याशयेन काव्येषु महाकाव्येषु चास्य प्रयोगः क्रियते ।

प्रहर्षिणी छन्दः हर्षोल्लासे प्रयुक्तं जातम् । हरिणी छन्दः नायकस्य अभ्युत्थानस्य सौभाग्यस्य च वर्णने प्रयुक्तमिति । ऋतुवर्णने आराध्यदेवस्य महत्तावर्णने सफलकार्यस्य वर्णने च वसन्ततिलकाछन्दसः प्रयोगं भवति ।

पुष्पिताग्राछन्दसः प्रयोगं उपलब्धिर्प्राप्तये अभ्युदयप्रापनाय कार्यसिद्धये च भवति । तोटकछन्दसः दुखनिवृत्तिवर्णने प्रयुक्तं जातम् ।

शालिनीछन्दः कृत्याकृत्योपलब्धये प्रयुक्तं भवति । नायकस्य भद्रशीलतायाः चित्रणमस्मिन् छन्दसि प्रयुक्तं भवेदिति ।

स्वागताछन्दसः प्रयोगं संयोगवशात् प्राप्तसम्पत्तिप्रसङ्गे भवति । शूरताविषयस्य वर्णनं शार्दूलविक्रीडितछन्दसः प्रयोगं भवति । शिखरणीछन्दसः प्रयोगं देवादीनामाराधने स्तुतिस्तोत्रादीनां कृते भवति ।

कतिपयानां छन्दसां प्रयोगं भिन्नभिन्नप्रसङ्गेषु भिन्नभिन्नावसरेषु च सन्दर्भानुसारेण क्रियन्ते ।

श्रीमद्भागवते प्रयुक्तप्रमुखछन्दयोजना –

संस्कृतवाङ्मये छन्दसां महत्त्वं पदे पदे परिलक्ष्यते । सर्वेषु छन्दःसु सर्वातिशायिलोकप्रियोऽस्ति छन्दः अनुष्टुप् । सर्वैः कविभिः विषयाणां भावनानां च प्रतिपादने अनुष्टुप्छन्दसः एव आश्रयन्ते । प्रथमे हि लोके अनुष्टुब्छन्दसः एव आविर्भावं भवति स्म । महर्षिवाल्मीकिः हृदयगतशोकं अनुष्टुप्–माध्यमेनैव अभिव्यनक्ति ।

श्रीमद्भागवते अनुष्टुप्छन्दः –

इदं छन्दः चतुर्चरणैः युक्तं समवृतोऽस्ति । प्रत्येकेऽस्मिन् पादे अष्टौ वर्णाः भवन्ति । अत्र प्रत्येकं पादे षष्ठः वर्णः गुरुः पञ्चमश्च लघुः भवति । द्वितीये, चतुर्थके च पादे सप्तमः वर्णः लघुः भवति, प्रथमे, तृतीये च पादे दीर्घः भवति –

श्लोके षष्ठं गुरुज्ञेयं सर्वत्र लघुपञ्चमम् ।

द्विचतुः पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥[१]

श्रीमद्भागवते सर्वाधिकानुष्टुप्छन्दसः प्रयुक्तं जातम् । आद्यः अनुष्टुपछन्दसः उदाहरणमत्र प्रस्तूयते –

कथितो वंशविस्तारो भवता सोमसूर्ययोः ।

राज्ञां चोभयवंश्यानां चरितं परमाद्भुतम् ॥[२]

श्रीमद्भागवते इन्द्रवज्रा

स्यादिन्द्रवज्रा यदितौ जगौगः ।[३]

इदं छन्दः चतुर्चरणैः युक्तमस्ति । एकादशाक्षरसमन्वितमिदं छन्दः । प्रत्येकचरणेषु द्वै तगणौ एकः जगणः तथा अन्त्ये द्वौ गुरू दीर्घौ वर्णौ च स्युः, तर्हि तदिन्द्रवज्रा नाम छन्दः स्यात् । अस्योदाहरणं श्रीमद्भागवते अनेकेषु स्थलेषु समुपलभ्यते । प्रथमस्कन्धे सूतोपदिष्टशुकदेवस्य स्तुत्यां छन्दस्यस्मिन् प्रयुक्तं जातम् –

यं प्रव्रजन्तमनुपेतमपेतकृत्यं

द्वैपायनो विरहकातर आजुहाव ।

पुत्रेति तन्मयतया तरवोऽभिनेदु–

स्तं सर्वभूतहृदयं मुनिमानतोऽस्मि ॥[४]

---

[1] छन्दोमञ्जरी

[2] श्रीमद्भागवते १०/१/१

[3] छन्दोमञ्जरी

[4] श्रीमद्भागवते १/२/२

श्रीमद्भागवते उपेन्द्रवज्रा –

उपेन्द्रवज्रा जतजास्ततो गौ ।[१]

इन्द्रवज्राछन्दसः प्रथमाद्याक्षरं हृस्वं भूते सति उपेन्द्रवज्रा भवति । एकादशाक्षरावृत्तेःइन्द्रवज्रायाः द्वितीयाक्षरादारभ्य एकादशाक्षरपर्यन्तं यः वर्णक्रमः भवति स एव उपेन्द्रवज्रायां भवति । उपेन्द्रवज्रायां केवलं प्रथमाक्षरः हृस्वं भवति । उपेन्द्रवज्रां भागवते सन्दृश्यते –

पितामहा मे समरेऽमरञ्जयैर्देवव्रताद्याति रथैस्तिमिङ्गिलैः ।
दुरत्ययं कौरवसैन्यसागरं कृत्वातरन् वत्सपदं स्म यत्प्लवाः ॥[२]

श्रीमद्भागवते इन्द्रवंशा

इन्द्रवंशायाः लक्षणं वृत्तरत्नाकरकारेण निगदितं यत्ट्ट–

स्यादिन्द्रवंशा ततजै रससंयुतैः ।[३]

अस्मिन् छन्दसि द्वादशाक्षराणि सन्ति । लघुगुरुवर्णविन्यास–वंशस्थविलसदृशो वर्तते केवलं वंशस्थविले प्रथमाक्षरः लघुः भवति तथा अस्य छन्दसः प्रथमाक्षरः दीर्घो जातः । द्वौ तगणौ जगणरगणौ स्युः तं इन्द्रवंशा इति कथ्यते ।

---

[1] छन्दोमञ्जरी पृष्ठ. ३४
[2] श्रीमद्भागवते १०/१/५
[3] वृत्तरत्नाकरः ३/४७

श्रीमद्भागवते असकृदुदाहरणानि सम्प्राप्तानि भवन्ति, दशमस्कन्धे पूतनाप्रसङ्गे इन्द्रवंशास्याः प्रयुक्तं जातम् –

सा मुञ्च मुञ्चालमिति प्रभाषिणी निष्पीड्य मानाखिलजीवमर्मणि ।
विवृत्य नेत्रे चरणौ भुजौ मुहुः प्रस्विन्नगात्रा क्षिपती रुरोद ह ॥[१]

श्रीमद्भागवते पुष्पिताग्रा

इदं छन्दः चतुर्भिः चरणैः युक्तं समवृत्तछन्दोऽस्ति । प्रथमे तृतीये च चरणे द्वादशाक्षराणि सन्ति , अस्य क्रमः – नगणौ, रगणः, यगणः, भवति । द्वितीये चतुर्थपादे च त्रयोदशाक्षराणि सन्त्यत्र नगणः, जगणौ, रगणः गुरुश्च ।अस्य लक्षणं छन्दोमञ्जरीकारेण वर्णितम् यत् –

अयुजि नयुगरेफतो यकारो युजि
च न जौ जगरश्च पुष्पिताग्रा । [२]

श्रीमद्भागवते नैकेषु स्थलेषु पुष्पिताग्राछन्दसः प्रयोगः दृश्यमानः । पितामहभीष्मः महाप्रयाणकालीन – वेलायां भगवतः कृष्णस्य स्तुतिं पुष्पिताग्राछन्दसि एव कृतोऽस्ति –

इति मतिरुपकल्पिता वितृष्णा
भगवति सात्वतपुङ्गवे विभूम्नि ।
स्वसुखमुपगते क्वचित्विहर्तुं
प्रकृतिमुपेयुषि यद् भवप्रवाहः ॥[३]

---

[1] श्रीमद्भागवते १०/६/११

[2] छन्दोमञ्जरी ३/५

[3] श्रीमद्भागवते १/९/३२

दशमस्कन्धेऽपि अस्योदाहरणं प्राप्यते –

इति खरपवनचक्रपांसु वर्षे
सुतपदवीमबलाविलक्ष्य माता ।
अतिकरुणमनुस्मरन्त्य शोचद्
भुविपतिता मृतवत्सका यथा गौः ॥[१]

श्रीमद्भागवते प्रहर्षिणी

इदं छन्दः त्रयोदशाक्षरसमन्वितमस्ति । प्रत्येकचरणे त्रयोदशाक्षराणि सन्ति, मगणः, नगणः, जगणः, रगणः, अन्त्ये एकः गुरुः अक्षरमस्ति । तृतीये दशमतमे च अक्षरेषु यतिः भवति । भागवते अस्य दिव्यता सन्दृश्यते –

यस्त्वेतद् भगवत ईश्वरस्य विष्णो–
र्वीर्याढ्यं वृजिनहरं सुमङ्गलं च ।
आख्यानं पठति शृणोत्यनुस्मरेद् वा
दुष्कीर्तिं दुरित्मपोह्य याति शान्तिं ॥[२]

श्रीमद्भागवते द्रुतविलम्बित

द्रुतविलम्बित लक्षणं छन्दोमञ्जरीकारेण वर्णितं यत् –

---

[1] श्रीमद्भागवते १०/७/२४

[2] श्रीमद्भागवते १०/५७/४२

द्रुतविलम्बितमाहनभौ भरौ ।[1]

इदं छन्दः द्वादशाक्षरसमन्वितं जातम् । चतुष्पादं समवृत्तं द्रुतविलम्बितं नाम छन्दः स्यात् । यस्य क्रमः – नगणः, द्वौ भगणौ, रगणः अस्ति । पादान्ते यतिरस्ति । भागवतस्य प्रथमस्कन्धस्य प्रथमेऽध्याये अस्योदाहरणं दृश्यते –

निगमकल्पतरोर्गलितं फलं
शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं
मुहुरहो रसिका भुवि भावुकाः ॥[2]

श्रीमद्भागवते प्रमाणिका

प्रमाणिका जरौ लगौ ।[3]

यत्र अष्टाक्षरवृत्तौ अनुष्टुभिः प्रतिपादं यथाक्रमं – जगण–रगण–लघु–गुरुवर्णाः सन्ति अथवा लघुगुरुवर्नसहितौ जगण–रगणौ स्तः तच्छन्दः प्रमाणिका भवति । उदहारणमस्य भागवते विद्यते यथा–

हरे तवाङ्घ्रिपङ्कजं भवापवर्गमाश्रिताः ।
यदेष साधुहृच्छयस्त्वयासुरः समापितः ॥[4]

श्रीमद्भागवते मालिनी

ननमययुतेयं मालिनी भोगिलौकैः ।[1]

---

[1] छन्दोमञ्जरी २/३१
[2] श्रीमद्भागवते १/१/३
[3] छन्दोमञ्जरी २/१९
[4] श्रीमद्भागवते ७/८/५१

पञ्चदशाक्षरसमन्वितमिदं छन्दः वर्तते । क्रमेण प्रथमे हि नगणद्वयं तदनन्तरं मगणः अन्त्ये यगणद्वयं प्रयोगं कृतवान् । प्रत्येकपादे सप्तमे अष्टमे चाक्षरे विरामो भवति तदेव छन्दः मालिनी इति नाम्ना प्रसिद्ध्यते ।

श्रीमद्भागवते मालिनी छन्दसः प्रयोगः व्यासेन भ्रमरगीते कृतः –

मधुप कितवबन्धो मा स्पृशाङ्घ्रिं सपत्न्याः
कुचविलुलितमालाकुङ्कुमश्मश्रुभिर्नः ॥
वहतु मधुपतिस्तन्मानिनीनां प्रसादं
यदुसदसि विडम्ब्यं यस्य दूतस्त्वमीदृक् ॥[२]

श्रीमद्भागवते मन्दाक्रान्ता

यत्र चतुर्षु चरणेषु यथाक्रमं मगणः, भगणः, नगणः, तगणौ, द्वौ गुरूवर्णौ च स्युः । चतुर्भिः , षड्भिः सप्तभिश्च अक्षरैः विरामो भवेत् तन्मन्दाक्रान्ताछन्दः भवत्येव ।

मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ ग युग्मम् ।[३]

श्रीमद्भागवते कतिपयानि उदाहरणानि सम्प्राप्तानि सन्ति । दशमस्कन्धस्य नवमेऽध्याये यशोदा दधिमन्थनं कुर्वती कृष्णस्य लीलानां स्मरणं कृतवती , गीतमपि गायति स्म –

क्षौमं वासः पृथुकटितटे बिभ्रती सूत्रनद्धं
पुत्रस्नेहस्नुतकुचयुगं जातकम्पं च सुभ्रूः ।

---

[1] वृत्तरत्नाकरे ३/८७
[2] श्रीमद्भागवते १०/४७/१२
[3] छन्दोमञ्जरी २/९३

रज्ज्वाकर्षश्रमभुजचलत्कङ्कणौ कुण्डले च
स्विन्नं वक्त्रं कबरविगलन्मालती निर्ममन्थ ॥[१]

शार्दूलविक्रीडितम् –

सूर्याश्वैर्यदिमः सजौ सततगाः ।[२]

एकोनविंशत्यक्षरसमन्वितमिदं छन्दः । यत्र चतुर्षु चरणेषु क्रमेण मगण–सगण–जगण–सगण–तगणयुगल–गुरुवर्णाश्च भवेयुः । द्वादशो सप्तमश्च अक्षरे विरामो भवेत् तच्छन्दः शार्दुलविक्रीडितनाम्ना अवज्ञायते ।

भगवता महर्षिणा श्रीमद्भागवतस्य मङ्गलाचरणे छन्दसोऽस्य प्रयुज्यते –

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदि कवये मुह्यन्ति यत्सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥[३]

श्रीमद्भागवते शिखरिणी

यत्र प्रतिचरणं यगण–महण–नगण–सगण–भगणाः अन्त्ये लघुगुरुश्च वर्णौ स्युः । षड्भिरक्षरैः एकादशाक्षरैश्च यति स्यात् । तच्चतुष्पदं समवृतं सप्तदशाक्षरमत्यष्टिजातीयं शिखरिणी नाम छन्दः इति कथ्यते ।

---

[1] श्रीमद्भागवते १०/९/३

[2] छन्दोमञ्जरी २/१०६

[3] श्रीमद्भागवते १/१/१

रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी ।[१]

श्रीमद्भागवते शिखरिणीछन्दसः उदाहरणम् उद्ध्रीयते –

इतीरेशेऽतर्क्ये निजमहिमनि स्वप्रमितिके
परत्राजातोऽतन्निरसनमुखब्रह्मकमितौ ।
अनीशेऽपि द्रष्टुं किमिदमिति वा मुह्यति सति
चच्छादाजो ज्ञात्वा सपदि परमोऽजाजवनिकाम् ॥[२]

श्रीमद्भागवते स्वागता

स्वागतेति रनभाद्गुरुयुग्मम् ।[३]

यस्य प्रत्येकेऽस्मिन् चरणे रगण–नगण–भगणाः द्वौ गुरू वर्णौ च स्युः तत्र त्रिष्टुब्जातीयं एकादशाक्षरवृत्तिः स्वागता नाम समवृत्तं स्यात् । अस्य छन्दसः तृतीये सप्तमे एकादशाक्षरे च विरामो विधीयते ।

श्रीमद्भागवते युगलगीतं स्वागताछन्दसि एव निर्दिष्टम् –

व्योमयानवनिताः सह सिद्धैर्विस्मितास्तदुपधार्य सलज्जाः ।
काममार्गणसमर्पितचित्ताः कश्मलं ययुरपस्मृतनीव्यः ॥[४]

श्रीमद्भागवते स्रग्धरा

स्रग्धरायाः लक्षणं वृत्तरत्नाकरे निगदितम् यत् –

म्रभ्नैर्यानां त्रयेणत्रिमुनियतियुता स्रग्धराकीर्तितेयम् ।[५]

---

[1] छन्दोमञ्जरी २/९०

[2] श्रीमद्भागवते १०/१३/५७

[3] वृत्तरत्नाकरे ३/३९

[4] श्रीमद्भागवते १०/३५/३

[5] वृत्तरत्नाकरे ३/१०२

यत्र चतुर्षु चरणेषु प्रतिचरणं मगण–रगण–भगण–नगणाः त्रयो भगणाश्च स्युः तच्छन्दः स्रग्धरा भवति । छन्दस्यस्मिन् एकविंशत्यक्षराणि सन्ति तथाच त्रिवारं प्रतिसप्ताक्षरेषु च यतिर्भवेदिति । श्रीमद्भागवते प्रस्तुतमिदं पद्यम् –

तीर्थं चक्रे नृपोनं यदजनि यदुषु स्वः सरित्पादशौचं,
विद्विट् स्निग्धाः स्वरूपं ययुरजितपरा श्रीर्यदर्थेऽन्ययत्नः ।
यन्नामामङ्गलघ्नं श्रुतमथ गदितं यत्कृतो गोत्रधर्मः,
कृष्णस्यैतन्न चित्रं क्षितिभरहरणं कालचक्रायुधस्य ॥[१]

श्रीमद्भागवते इन्दिरा

श्रीमद्भागवतस्य प्राणरूपं ख्यापितं दशम स्कन्धं तस्मिन्नपि पञ्चसु गीतेषु प्राधानत्वरूपेण शोभायमानं भवति गोपीगीतम् । गोपीगीते इन्दिराछन्दसः प्रयोगः कृतः वेदव्यासेन ।

इन्दिराछन्दसः लक्षणं अनेकैः विद्वद्भिः स्व–स्वमतानुसारेण अपरनाम्नापि विरच्यते । अस्याः इन्दिरायाः अपर नाम राजहंसी, इन्दिरा, कामिनी, भद्रिका, कामचारिणि, जाह्नवी–इत्यादीनि नामानि समुपलब्धानि भवन्ति । इन्दिराछन्दसि एकादशाक्षराणि सन्निहितानि सन्ति । चतुर्षु चरणेषु समानक्षराणि सन् इदं छन्दः समवृत्तोऽस्ति ।

नररलैर्गुराविन्दिरा मता ।[२]

समग्रगोपीगीते अस्य लक्षणं नैव संघटितम् । द्वितीयश्लोकस्य द्वितीयपादे एकादशाक्षराणि नैवास्ति अपितु दशाक्षराणि एव विद्यते । अत्र मरालिका छन्दः जायते ।

---

[1] श्रीमद्भागवते. १०/९०/४७

[2] छन्दोमञ्जरी पृष्ठ. ४४

जयति तेऽधिकं जन्मना व्रजः

श्रयत इन्दिरा शश्वदत्र हि ।

दयित दृश्यतां दिक्षु तावका–

स्त्वयि धृतासवस्त्वां विचिन्वते ॥[1]

श्रीमद्भागवतमहापुराणं सर्वशास्त्रसारतत्त्वरूपेण प्रतिष्ठितं जगत्यस्मिन् । छन्दशास्त्रस्य दिव्यता, सौन्दर्यता, व्यापकता, उद्भावितात्र पौनः पुण्येन सन्दृश्यते ।

(च) श्रीमद्भागवते गुणविषयकवर्णनम्

काव्यशास्त्रिभिः बहुविधनिगदितं यत्– "काव्यशोभायाः कर्तारो धर्माः गुणाः ।[2]काव्यशोभां वर्धयति यानि तत्त्वानि तेषां गुणधर्मरूपेण स्वीक्रियते । ते चौजःमाधुर्यप्रसादयः सन्ति । आचार्यदण्डिना गुणानां दशभेदाः स्वीकृताः तथापि गुणस्य सामान्यलक्षणं नैव दत्तं तेन । केवलमलङ्कारस्य स्पष्टतया परिभाषा प्रकटिता । तया परिभाषया गुणलक्षणमपि ध्वनितम् । यतोहि अलङ्कारपरिभाषामपि विस्तृतरूपेण स्वीकृता । अस्य मते सौन्दर्यविधायकं समस्तं तत्त्वमलङ्कारान्तर्गतमेव भवति । परवर्तिनः काव्यशास्त्रिणः कथयन्ति यत् गुणः स्वतन्त्रधर्मः वर्तते नालङ्काराश्रितः ।

अनेन कारणेन काव्यशोभायाः अर्थः शब्दार्थशोभा तद्विधायकतत्त्वानि गुनरूपत्त्वेन स्वीक्रियते । ध्वनिकारेण स्वतन्त्ररूपेण गुणानामस्तित्वं नैव स्वीकृतं शब्दार्थस्य धर्मः एव गुणः । मम्मटेनापि रसाश्रितः गुणः स्वीकृतः–

---

[1] श्रीमद्भागवते १०/३१/१

[2] काव्यालङ्कारसूत्रवृत्तिः १/३

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।[१]

एवंप्रकारेण गुणाः काव्यस्य उत्कर्षाधायकतत्त्वानि सन्ति । माधुर्यादिगुणाः रसेन सह सम्बद्धाः शब्दार्थयोः चमत्कृत् गुणाधारितास्ति । रसस्य धर्मत्त्वात् गुणः चित्तवृत्तिः स्वरूपेण अभिमन्यते ।

यदा गुणविषये मनोवैज्ञानिकदृष्ट्या विचार्यते तदा रसः गुणश्च उभावपि मनःस्थितिर्वर्तते ।रसः आनन्दस्वरूपमनःस्थितिः, गुणः चित्तवृत्तिरूपमनःस्थितिः । अनेन कारणेन गुणालङ्कारयोः अन्तरमस्ति ।

गुणस्य आद्यः प्रतिष्ठापिकोऽचार्यः वामनः वर्तते । किन्तु सर्वप्रथमं गुणवर्णनं आचार्यो भरतमुनिरकरोत् । स दशप्रकाराणां काव्यार्थगुणानां वर्णनं नाट्यशास्त्रेऽकार्षीत् । ते च गुणाः सन्ति –

श्लेषः समता समाधिर्माधुर्यमोजः पदसौकुमार्यम् ।
अर्थस्य च व्यक्तिरुदारता च कान्तिश्च काव्यार्थगुणा दशैते ॥[२]

भरताद् दण्डापि दश गुणाः स्वीकृताः किन्तु शब्दार्थगतभेदाः नैव स्वीकृताः अयन्तु एतान् गुणान् वैदर्भमार्गस्य प्राणभूतान् स्वीकरोति । आचार्यवामनः दशगुणान् व्याख्या नवीनतया अकार्षीत् । आचार्यवामनः काव्यशोभाकारकधर्मं गुणः कथ्यते –

"काव्यशोभायाः कर्तारो धर्माः गुणाः ।[३]

"ये खलु शब्दार्थयोर्धर्माः काव्यशोभाम् कुर्वन्ति ते गुणाः ते चौजः

---

1 काव्यप्रकाशे ८/६६

2 नाट्यशास्त्रे

3 काव्यालङ्कारसूत्रवृत्तिः १/३

प्रसादयः । न यमकोपमादयः केवलमेतेषां काव्यशोभाकस्त्वात् । ओजप्रसादीनां तु केवलानामस्ति काव्यशोभाकरत्वमिति" ।[१]

धर्मार्थयोः धर्मः यत्काव्यं शोभासम्पन्नं क्रियते सैव गुणः । गुणालङ्कारयोरपि भेदः सन्दृश्यते । गुणः काव्याय नित्यः अपरिहार्योऽस्ति किन्त्वलङ्कारः नैव अपरिहार्यः । गुणनामभावे काव्यस्थितिः नैव सम्भवति ।

भरततः मम्मटपर्यन्तं सर्वेषामाचार्याणां गुणसंख्याविषये मतमतान्तरं परिलक्ष्यते । भरतेन दशैव संख्या स्वीकृता । आचार्यभामहेन गुणस्य संख्या त्रयः एव स्वीकृता माधुर्यौजप्रसादयश्च । आचार्यमम्मेटनापि त्रयः एव गुणाः स्वीकृताः । वस्तुतः इमे त्रयः गुणाः काव्यस्य कृते आवश्यकमेव । आचार्यदण्डिना दशगुणाः तथा दण्डिनेव वामनेनापि दशैव गुणाः शब्दार्थाश्रितभेदेन अङ्गीकृताः ।

श्रीमद्भागवते दशगुणानां वर्णनं समुपलभ्यते । अत्र भागवताश्रित्य दशगुणानामुदाहरणैः सह प्रस्तूयन्ते ।

श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।
अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ॥[२]

प्रथमे हि मम्मटस्वीकृतत्रयाणां गुणानां वर्णनं क्रियते ट्ट

श्रीमद्भागवते माधुर्यगुणः–

माधुर्यगुणस्य लक्षणं काव्यप्रकाशकारेणोक्तं यत् –

आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम् ।[३]

---

[1] काव्यालङ्कारसूत्रवृत्तिः ३/१/१ तस्य वृत्तिः

[2] काव्यदर्शे १/४१

[3] काव्यप्रकाशे ८/६८

अत्र काव्यप्रकाशकारेण माधुर्यस्य यत्स्वरूपं वर्णनं क्रियते तद्ध्वनिकारस्य माधुर्यसमीक्षानुसारेण अस्ति । ध्वनिकारेण शृङ्गारं परममधुरपरमाह्लादमयं रसं कथ्यते माधुर्यमपि अस्मिन्नेव प्रतिष्ठितं कृतम् ।

आचार्यभरतेन नाट्यशास्त्रे माधुर्यगुणस्य लक्षणं प्रतिपादितं यत् ट्ट

बहुशो यच्छ्रुतं वा क्यमुक्तम् वापि पुनः पुनः ।

नोद्वेजयति यस्माद्धि तन्माधुर्यमिति स्मृतम् ॥[1]

बहुशो यद्वाक्यं श्रुतं कथितं वा मनसि कुतूहलं एधते उद्वेगः नैव भवति सः एव माधुर्यगुणोऽस्ति । श्रीमद्भागवते अस्योदाहरणान्यनेकेषु स्थलेषु समुपलब्धानि –

सत्यव्रतं सत्यपरं त्रिसत्यं

सत्यस्य योनिं निहितं च सत्ये ।

सत्यस्य सत्यमृतसत्यनेत्रं

सत्यात्मकं त्वां शरणम् प्रपन्नाः ॥[2]

ब्रह्मादिदेवाः भगवतः विष्णोः स्तुतिम् कुर्वन्ति । प्रभो ! भवान् सत्यसङ्कल्पोऽस्ति सत्यैव भवत्प्राप्तिः श्रेष्ठसाधनत्त्वम् । भवान् सृष्टेः प्राक् प्रलयानन्तरमपि, जगतह् स्थितिसमयेऽपि भवान्नेव सत्यम् । पञ्चभूतानां कारणमपि भवान्नेव, भवान् सत्यस्वरूपमेव वयं त्वां शरणं गताः ।

पद्येऽस्मिन् टवर्गीयवर्णस्याभावः, पदलघुसमासान्तः सानुस्वरश्चास्ति । फलस्वरूपेणात्र कोमलकान्तपदावली भूतत्त्वाद् माधुर्यगुनम् भवति । अस्मिन् पद्ये देवताविषयकरतिभावस्याभिव्यञ्जना प्रतिभाषते । अन्यापि उदाहरणमत्र प्रस्तूयते ट्ट

---

1 नाट्यशात्रम् १७/१००

2 श्रीमद्भागवते १०/२/२६

समाश्रिता ये पदपल्लवप्लवं महत्पदं पुन्ययशो मुरारेः ।
भवाम्बुधिर्वत्सपदं परं पदं पदं पदं यद् विपदां न तेषाम् ॥[१]

अत्र पदपल्लवप्लवं शब्दे तथा परं पदं पदं पदं अस्मिन् पद्ये अनुप्रासस्य दिव्यता प्रतिभाति सानुस्वारपदः मधुररसस्य सञ्चरणं करोति । अत्र क्लिष्टवर्णानामभावः मधुरवर्णानां सद्भावः माधुर्यगुणसङ्गठने अत्यधिकसहायकरूपेण विद्यते ।

श्रीमद्भागवते ओजगुणः

यस्य गुणस्य रचना विशेषे विद्यमानभुतं चित्ते आवेगः या स्फूर्तिः उत्पन्नमभवत् तं  ओजगुणः कथ्यते । अयं गुणः शौर्य तथा कठोरतायाः परिचायिकः भवति । येन ओजगुणपूर्णकाव्ये मधुरपदावल्याः अभावः भवति अयं गुणः वीरः रौद्रः भयानकः तथा वीभत्सरसानां काव्ये विशेषरूपे परिलक्षितं भवति । अस्मिन् गुणे संयुक्तवर्णः, द्वित्ववर्णः, रेफयुक्तसंयोगः दीर्घसमासः, टवर्गपञ्चमवर्णः जिह्वामूलीयः उपध्मानीयः विसर्गः सकारः झयः प्रत्याहारादयः प्रयुक्ताः भवन्ति ।

योग आद्यतृतीयभ्यामन्त्ययो रेण तुल्ययोः ।
टादिः शषौ वृत्तिदैर्घ्यं गुम्फ उद्धत ओजसि ॥[२]

श्रीमद्भागवते ओजगुणस्योदाहरणं प्रचुरमात्रेण सम्प्राप्यते –

---

[1] श्रीमद्भागवते १०/१४/५८

[2] काव्यप्रकाशः ८/७५

सर्पह्रदः पुरुषसारनिपातवेग–

संक्षोभितोरगविशोच्छ्वसिताम्बुराशिः ।

पर्यक्प्लुतो विषकषायविभीषणोर्मि–

र्धावन् धनुःशतमनन्तबलस्य किं तत् ॥[१]

यमुनाजलं कालियनागविषकारणत्त्वात् संक्षोभितोऽस्ति । तस्य तरङ्गानि रक्तपीतात्यन्तभयानकरूपेण परिदृश्यते । भगवतः श्रीकृष्णस्य जले कूर्दन् कारणत्त्वात् जलं अधोऽधः भवति । तस्मिन् समये तु कालियदहस्य जलं इतस्ततः भूत्वा चतुहशतं हस्तपरिमितं प्रविस्तरणं जातम् । अनन्तवलशालिने श्रीकृष्णाय वार्तेयं आश्चर्यरूपेण नास्ति ।

उपर्युक्तपद्ये वीररसस्य चित्रणमस्ति । कृश्णस्य वीरता कालियनागस्य भयानकस्य चित्रणे ओजगुणोऽस्ति । पठनेव हृदये दीप्तिरजायत । यत्र द्वित्त्ववर्णं संयुक्तवर्णं रेफसम्योगः, समासाधिक्य एवं टवर्गस्याधिकतास्ति ।

श्रीमद्भागवते प्रसादगुणः

प्रसादगुणे सरलसुबोध श्रवणमात्रेण अर्थावबोधकारयितारः शब्दाः प्रयुक्ताः भवन्ति । फलतः सुगमार्थप्रतीतिः अस्य परिचायको वर्तते । अयं सरलतमः अर्थावबोधकसर्वरसः रचनासु प्राप्तं भवति । अस्य श्रवणेन चितविकसितं भवति । अयं गुणः यत्र विद्यमानं भवति तत्रत्या भाषा अपि सरलपूर्णा भवति –

---

[1] श्रीमद्भागवते १०/१६/७

श्रुतिमात्रेण शब्दास्तु येनार्थप्रत्ययो भवेत् ।

साधारणः समग्राणां स प्रसादो गुणो मतः ॥[१]

श्रीमद्भागवते अनेकेषु स्थलेषु प्रसादगुणस्य दिव्यता परिलक्ष्यते । चाणूरमुष्टिकाभ्यां सह युद्धनार्थं आहूत कृष्णवलरामौ दृष्ट्वा तत्रस्थिताः नार्यः परस्परं वार्तालापं कुर्वन्ति –

क्व वज्रसारसर्वाङ्गौ मल्लौ शैलेन्द्रसन्निभौ ।

क्व चातिसुकुमाराङ्गौ किशोरौ नाप्तयौवनौ ॥[२]

श्लोकस्यास्यार्थं स्पष्टं प्रतिभासते ।

श्रीमद्भागवते श्लेषगुणः

यत्रानेकपदपरस्परं सुश्लिष्टं भवति। यत्र महाप्राणवर्णानामाधिक्यं स्युः स एव गुणः श्लेषः ।

सुश्लिष्टं सन्निवेशत्वं शब्दानां श्लेष उच्यते ।[३]

श्रीमद्भागवते अस्य गुणस्योदाहरणमत्र प्रस्तूयते –

तवावतारोऽयमधोक्षजेह स्वयम्भराणामुरुभारजन्मनाम् ।

चमूपतीनामभवाय देव भवाय युष्मच्चरणानुवर्तिनाम् ॥[४]

अत्र आदित्रयेषु चरणेषु भिन्नपदानां प्रतीतिकारणात् संदर्शश्लिष्टभूतत्त्वात् श्लेषगुणः भवति ।

---

[1] काव्यालङ्कारसूत्रवृत्तिः १००

[2] श्रीमद्भागवते १०/४४/८

[3] अग्निपुराणे ३४६/६

[4] श्रीमद्भागवते १०/२७/९

श्रीमद्भागवते समतागुणः

काव्यादर्शकारेण अस्य समतागुणस्य लक्षणं लक्षितम् –

समानतुल्यादिभावः यद्दृश्यते तत्र समतागुणः समुपजायते ।

अहो इमं पश्यत मे विनाशं तपस्विनः सच्चरितव्रतस्य ।

अन्तर्जले वारिचरप्रसंगात् प्रच्यावितं ब्रह्म चिरं धृतं यत् ॥[१]

अत्र समतागुणं भवति ।

श्रीमद्भागवते सुकुमारता

सुकुमारतार्थं भवति सुकोमलता । यत्र अनिष्ठुरवर्णानां सुकोमलवर्णानां प्रयोगं भवति तत्र सुकुमारातगुणं भवति ।

यदि वीरो महाराज तेनैव त्वां यजे इति ।

तथेति वरुणेनास्य पुत्रो जातस्तु रोहितः ॥[२]

अत्र संयुक्तवर्णानामभावकारणत्त्वाद् सुकुमारवर्णयोजनास्ति अत एव अत्र सुकुमारतगुणं भवति ।

श्रीमद्भागवते अर्थव्यक्तिगुणः

अर्थव्यक्तेः शब्दार्थोऽयं अर्थस्य प्रकाशनम् ।

अर्थव्यक्ति पदानां हि झटित्यर्थसमर्पणम् ।[३]

[1] श्रीमद्भागवते. ९/६/५०

[2] श्रीमद्भागवते ९/७/९

[3] साहित्यदर्पणे ८/१२

यत्र शब्दैः पदैश्च सकलार्थस्य पूर्णाभिव्यक्तिं भवतु तत्र अर्थव्यक्तिः गुणः मन्यते । श्रीमद्भागवतमहापुराणेऽस्योदहरणं वर्तते –

न साधुवादो मुनिकोपभर्जिता

नृपेन्द्रपुत्रा इति सत्त्वधामनि ।

कथं तमो रोषमयं विभाव्यते

जगत्पवित्रात्मनि खे रजो भुवः ॥[१]

पद्येऽस्मिन् भावानां स्वाभाविकरूपेण स्फुटं भूतत्वादर्थव्यक्तिगुणः उपजायते ।

श्रीमद्भागवते उदारतागुणः

काव्यादर्शे दण्डिना उदारतायाः गुणस्य लक्षणं प्रदीयते –

उत्कर्षवान् गुणः कश्चिद् यस्मिन्नुक्ते प्रतीयते ।

तदुदाराह्वयं तेन सनाथां सर्वपद्धतिः ॥[२]

यस्य भूतत्वाद् प्रतिपाद्यार्थे उत्कर्षस्य प्रतीतिरुपजायते स एवोदारतागुणं भवति। श्रीमद्भागवते उदारतायाः प्रचुरमात्रायामुदाहरणानि संग्रथितानि सन्ति । यथा–

श्रीमद्भागवते कान्तिगुणः

कान्तेरर्थम् आभा उज्ज्वलता कमनीयता च वर्तते – कान्तिगुणे कर्णप्रियक्रीडाशीलतायाः वर्णनं भवति ।

[1] श्रीमद्भागवते ९/८/१३

[2] काव्यादर्शः १/७६

कान्तं सर्वजगत्कान्तं लौकिकार्थानतिक्रमात् ।

तच्चवार्ताभिधानेषु वर्णनास्वपि दृश्यते ॥[१]

श्रीमद्भागवते अस्य गुणस्यानेकोदाहरणं समुपलभ्यते –

कृष्ण कृष्ण महायोगिन् विश्वात्मन् विश्वसम्भव ।

भवता लोकनाथेन सनाथा वयमच्युत ॥[२]

अत्र देवताभिः कृष्णस्य स्तुतिं क्रियते । अत्र कर्णप्रियशब्दानां प्रयोगकारणत्त्वात् कान्तिगुणः भवति ।

श्रीमद्भागवते समाधिगुणः

आचार्यदण्डी काव्यदर्शे समाधिगुणस्य लक्षणं प्रदीयते –

अन्यधर्मस्ततोऽन्यत्र लोकसीमानुरोधिना ।

सम्यगाधीयते यत्र स समाधीः स्मृतो यथा ॥[३]

लोकसीमानुरोधेन अन्यस्य धर्मस्य अन्यत्र आरोपयति तत्र समाधुगुणः भवति । ग्रन्थे समाधिगुणस्याल्पमात्रायामुदाहरणं सम्प्राप्नोति ।

नैते सुरेशा ऋषयो न चैते

त्वमेव भासीश भिदाश्रयेऽपि ।

सर्वं पृथक्त्वं निगमात् कथं

वदेत्युक्तेन वृत्तं प्रभुणा बलोऽवैत् ॥[१]

---

[1] काव्यादर्शे १/८५

[2] श्रीमद्भागवते १०/२७/१९

[3] काव्यादर्शे १/९३

अत्र अन्यधर्मस्य अन्योपरि आरोपणं भवत्येव अत एव समाधिगुणः जायते ।

सा देवकी सर्वजगन्निवास

निवासभूता नितरां न रेजे ।

भोजेन्द्रगेहेऽग्निशिखेव रुद्धा

सरस्वती ज्ञानखले यथा सती ॥[२]

पद्येऽस्मिन् मनोरमलालित्यपूर्णविशेषणैः सह सुन्दरशब्दावली प्रयुक्ता अत एव उदारतागुणः भवति ।

अनेन सोदाहरणेन ज्ञायते यत् समग्रभागवतमहापुराणे पूर्णतया दशगुणानां वर्णनं समुपलब्धम् । गुणनियोजनानां दृष्ट्या अस्य महाग्रन्थस्य श्रीमद्भागवतस्य महाकाव्यत्वं सिद्धं भवति ।

## (छ) श्रीमद्भागवते दोषनिरूपणम्

पुराणेषु अनेकानि काव्यतत्तानि सन्निहितानि तथापि केचित् दोषाः अपि सन्दृष्टाः काव्याशस्त्रिभिः । यथोक्तं अग्निपुराणे "उद्वेगजनको दोषः"इति तथैव दण्डिना काव्यादर्शे सङ्केतितम् –

तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन ।

स्याद्वपुः सुन्दरमपि श्वेत्रेणैकेन दुर्लभम् ॥[३]

---

[1] श्रीमद्भागवते १०/१३/ ३९

[2] श्रीमद्भागवते १०/२/१९

[3] काव्यादर्शे ७/७

यथा सुन्दरे शरीरे किञ्चित् कुष्ठत्वेन सौन्दर्यं विगलति तथैव काव्येष्वपि न्यूनदोषः काव्यस्य विरूपं करोति । दोषाः अपकर्षकाः भवन्ति । काव्यशास्त्रिभिः दोषभेदाः पञ्चधा स्मृताः तद्यथा– पददोषः, पदांशदोषः, वाक्यदोषः, अर्थदोषः, रसदोषश्चेति । तत्रापि अवान्तररूपेण काव्यकारैः अनेके दोषाः सङ्कीर्तिताः । अत्र श्रीमद्भागवतस्य अध्ययनं क्रियते यदा तदा विहगावलोकनेनैव दोषनिरूपणं कर्तुं शक्यते ।

श्रीमद्भागवते सामान्यदोषाणां निरूपणं क्रियतेऽत्र । यथा– निरर्थकदोषः, अप्रयुक्तदोषः, श्रुतिकटुत्वदोषः, हतवृत्तदोषः, अकाण्डप्रथनदोषः, सन्दिग्धदोषः, अधिकपददोषः इत्यादयः । श्रीमद्भागवते निरर्थकदोषस्य निदर्शनमनेकेषु स्थलेषु उपलभ्यते । अयं दोषः पादपूर्त्यर्थं उतवा अनावश्यकशब्दानां नियोजनार्थं भवति । यथा –

निरर्थकं पादपूरणमात्रप्रयोजनं चादिपदम् ॥[१]

श्रीमद्भागवते अस्योदाहरणं सम्प्राप्नोति –

गोवर्धने धृते शैले आसाराद् रक्षिते व्रजे ।

गोलोकादाव्रजत् कृष्णं सुरभिः शक्र एव च ॥[२]

अत्र पादपूर्त्यर्थं एवादिशब्दानां प्रयोगाः कृतः ग्रन्थकारेण । अत्र निरर्थकदोषोपजायते । अप्रयुक्तदोषः– अप्रयुक्तदोषः प्रायेण अप्रसिद्धशब्दानां प्रयोगेण उपजायते । श्रीमद्भागवते दोषोऽयं अत्यल्परूपेण प्रभवति । प्रथमस्कन्धास्याष्टमाध्याये उदाहरणं प्राप्यते –

---

[1] काव्यप्रकाशः

[2] श्रीमद्भागवते १०/२७/१

तां बाढमित्युपामन्त्र्य प्रविश्य गजसाह्वयम् ।

स्त्रियश्च स्वपुरं यास्यन् प्रेम्णा राज्ञा निवारितः ॥[१]

अत्र हस्तिनापुरस्य कृते गणसाह्वयशब्दप्रयोगेण अप्रयुक्तदोषोपजायते । वस्तुतस्तु शब्दे नात्र दोषः तथापि अप्रसिद्धः वर्तते । अनेन कारणेन दोषांशः सन्दृश्यते । श्रुतिकटुत्वदोषः– यदा काव्यकारैः कर्णकटुत्वशब्दानां प्रयोगः क्रियते तदा अयं दोषः भवति । यथोक्तं विश्वनाथेन – दुश्रवन्निविधा [२] । यदा परुषवर्णनांउत वा कर्कशशब्दानां प्रयोगः भवति तदा अयं दोषोपजायते । नवमस्कन्धे अस्योदाहरणं प्राप्यते –

नावधीद् गुरुवाक्येन चक्रे विकृतवेषिणः ।

मुण्डाञ्छ्मश्रुधरान् कांश्चिमुक्तकेशार्धमुण्डितान् ॥[३]

इत्यत्र कवर्गस्य बाहुल्यं टवर्गस्य संयुक्तप्रयोगः श्रुतिकटुत्वदोषं प्रति सङ्केतयति । हतवृत्तदोषः– अयं दोषः अनेकविधः स्वीकृतः काव्यशास्त्रिभिः । यदा पद्येषु यतिभङ्गः हीनादिकाशब्दप्रयोगः भवति तदा हतवृत्तदोषः जायते । अस्योदाहरणानि अनेकानि सन्ति । यथा –

विप्रकीर्णजटाच्छन्नं रौरवेणाजिनेन च ।

विशुष्यत्तालुरुदकं तथाभूतमयाचत ॥[४]

नमस्तुभ्यं भगवते पुरुषाय महात्मने ।

वासुदेवाय कृष्णाय सात्वतां पतये नमः ॥[५]

---

[1] श्रीमद्भागवते १/८/४५

[2] साहित्यदर्पणः ७/२

[3] श्रीमद्भागवते ९/८/६

[4] श्रीमद्भागवते १/१८/२७

[5] श्रीमद्भागवते १०/२७/१०

अविमृष्टविधेयांशदोषः– पद्ये यस्य प्रधानरूपेण वर्णनं करोति तं प्रधानां अप्रधानं कृत्वा वर्णनं क्रियते स एव दोषः अविमृष्टविधेयांशदोषः कथ्यते ।श्रीमद्भागवते अस्य दोशस्यापि यत्र तत्र समावेशः सन्दृश्यते –

स इन्द्रशत्रुः कुपितो भृशं तया महेन्द्रवाहं गदयोग्रविक्रमः ।

जघान कुम्भस्थल उन्नदन् मृधे तत्कर्म सर्वे समपूजन्यन्नृप ॥[१]

पद्येऽस्मिन् वृत्रासुरस्य वर्णनं जातम् किन्तु तस्य अप्राधनं कृत्वा इन्द्रस्य वर्णनं प्रधानं भवति, अतः अत्र अविमृष्टविधेयांशदोषोपजायते ।

एतादृशानां दोषाणां भूतत्त्वादपि श्रीमद्भागवतामहापुराणस्य काव्यतत्त्वं अत्यन्तरमणीयं रसभावयोजनासहितं गुणयोजनासहितं च विद्यते ।

(ज) श्रीमद्भागवतस्य भाषाशैलीनिरूपणम्

सर्वेषां ग्रन्थानां आधारभूमिः भाषैव निगद्यते । यतोहि भाषां विना किमपि शास्त्रं स्वमतं जनेषु हृदयपटलेषु सन्निविष्टं नैव कर्तुम् शक्यते ।अत एव भाषा प्रामुख्यत्त्वेन वाङ्मयस्य आधारशिलास्ति । श्रीमद्भागवतस्य भाषा एव शैली अनयोः सर्वेषु पुराणेषु श्रेष्ठतमा सुसंस्कृता, सरला, समाससहिता समासरहितापि च वर्तते । अस्य भाषा नातिदुरूहा, सरला, सुबोधा, सुगम्या, साहित्यिकगुणानां परिपूर्णा च वर्तते । उपमारूपकोत्प्रेक्षालङ्काराणां बाहुल्योपयोकारणत्त्वाद् सौष्ठवमाधुर्मयी सालङ्कारा, समासान्तयुक्ता भाषा श्रीमद्भागवते सन्दृश्यते । प्रसङ्गानुसारेण शब्दानां चयनमत्यन्तरमणीयमस्ति ।

[1]श्रीमद्भागवते ६/११/१०

भागवतकारेण यत्र कोमलभावानां अभिव्यञ्जना अभीष्टमासीत् तत्र सः रमणीयपदानां प्रयोगं कृत्वा भाषायाम् अपूर्वसौन्दर्यस्य अभियोजना क्रियते ट्ट

न यत्र कालोऽनिमिषां परः प्रभु
कुतो नु देवा जगतां य ईशिरे ।
न यत्र सत्त्वं न रजस्तमश्च
न वै विकारो न महान् प्रधानम् ॥[१]

माधुर्यगुणयुक्ता भाषा एवं शब्दवैचित्र्याधिकं समुपलभ्यते । अनुप्रासस्य दिव्यता नामवर्नने साक्षाद्रूपेण परिलक्ष्यते –

भानुः सुभानुः स्वर्भानुः प्रभानुभानुमांस्तथा ।
चन्द्रभानुर्बृहद्भानुरतिभानुस्तथाष्टमः ॥
श्रीभानुः प्रतिभानुश्च सत्यभामात्मजा दश ॥[२]

श्रीमद्भागवतस्य भाषा समाधिभाषा इति नाम्ना प्रसिद्धा वर्तते । शुद्धद्वैतसम्प्रदायस्य आदिमः श्रीमहाप्रभुवल्लभाचार्यमहाभागेन अभिमतमिदं वर्तते यत् व्यासनारायणः श्रीमद्भागवतस्य साक्षात्कारः समाधिद्वारा अकरोत् । अत एव अस्या भाषां समाधिभाषा कथ्यते । वल्लभाचार्येण स्वग्रन्थे तत्त्वदीपनिबन्धे अलिखत् ट्ट

वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि ।
समाधिभाषा व्यासस्य प्रमाणं तच्चतुष्टयम् ॥

श्लोकेऽस्मिन् भागवतशब्दस्य प्रयोगः नैव कृतः अपितु समाधिभाषया भागवतदं सङ्केतयति । श्रीमद्भागवते चतुर्णां शैलीनां समुचितरूपेण प्रयोगं

---

[1]श्रीमद्भागवते २/२/१७
[2]श्रीमद्भागवते १०/६१.१०–११

कृतवान् । किन्तु चतुर्षु शैलीषु प्रामुख्यत्वेन वैदर्भीशैलीं प्रयोगयति । कृष्णस्य स्तुतिप्रसङ्गे अस्य श्रीमद्भागवतस्य भाषा अतीव सौन्दर्यमयी प्रवाहमयी च अनुभूयते । प्रकृतिचित्रणे कविः स्वभावमयता अपि च कल्पनायाः साक्षात्प्रदर्शनं अभिव्यनक्ति । वाक्ययोजना सरला शब्दविन्यासः हृदयग्राही च वर्तते ।

प्रसादगुणस्य सौकर्यता, स्पष्टता, माधुर्यगुणस्य मधुरता, संगीतात्मकता एवं चित्रात्मकतायाः सजीवतया सम्पन्नभावात्मकभाषायाः समीचनमुदाहरणमस्ति ट्ट

क्व वज्रसारसर्वाङ्गौ मल्लौ शैलेन्द्रसन्निभौ ।
क्व चाति सुकुमाराङ्गौ किशोरौ नाप्तयौवनौ ॥[१]

महाकविना भावानुकूलानां छन्दसां प्रयोगं क्रुत्वा भागवतं रमणीयता प्रदानमकरोत् ।अनेन प्रकारेण भागवतपुराणमलङ्कारैः सुसज्जितम्, गुणानां विभूषितं रसमयकाव्यरचनास्ति ।

## (२) श्रीमद्भागवते काव्यतत्त्वानां वैशिष्ट्यं तदुपयोगिता च

संस्कृतवाङ्मये अनेकविधानि शास्त्राणि अनेकविधानि काव्यानि च सन्ति । विविधानां शास्त्राणां प्रयोजनं उद्देश्यं फलं च पुरुषार्थचतुष्ट्यसिद्धये पर्यवसितम् । तथैव अन्यान्यकाव्यान्यपि पुरुषार्थसिद्धिप्रदेयानि सन्ति । यदुक्तं भामहेन –

[1]श्रीमद्भागवते १०/४४/८

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
प्रीतिं करोति कीर्तिञ्च साधुकाव्यनिबन्धनम् ॥[१]

काव्यानामुपजीवतत्त्वं पुराणेष्वपि प्राप्यते । किन्तु तत्र यावत् आख्यानोपजीव्यानि सन्ति तथैव रसादिनिर्वहणेऽपि उपजीव्यं पुराणामपि सिद्धयति । यतोहि महाकविकालिदासः तदोत्तरवर्तिनः कवयः ये सन्ति यथा –महाकविभारविः, हर्षः, वाणभट्ट, माघादयः तैः सर्वैः काव्येषु अलङ्कारशैलीं स्वीकृत्य पाण्डित्यपूर्णशैलीञ्च पौराणिकाख्याधारितानि काव्यानि विरचितानि । अनेन कारणेन तेषां काव्येषु पुराणानामालोकः प्रकाशः द्योतते । अत एव इदमपि सिद्धयति यत् पुराणेषु विशेषेण श्रीमद्भागवते काव्यतत्त्वानां वैशिष्ट्यं तदुपयोगिता च सर्वैः विद्वद्भिः अनुभूयते ।

काव्यानां यानि स्वरूपाणि विधानानि स जगति प्रसिद्धानि सन्ति । तेषां समेषां काव्यतत्त्वानां उपजीव्यांशानि श्रीमद्भागवते सन्निहितानि सन्ति । तद्यथा – भागवते द्विविधं काव्यतत्वमुपलभ्यते स्वरूपदृष्ट्या वस्तुदृष्ट्या । स्वरूपदृष्ट्या तु गद्यात्मकं पद्यात्मकं च । वस्तुदृष्ट्या तु त्रिविधं काव्यतत्त्वमस्ति उपदेशात्मकं गीतात्मकं संदेशात्मकञ्च । अन्य दृष्ट्या यदा विचार्यते तदा श्रीमद्भागवते प्राधान्येन रसयोजनं, गुणदोषविवेचनं, अलङ्कारयोजनं, छन्दयोजनञ्च काव्यतत्त्वरूपेण समुपलभ्यते । अनेन सह भाषाभङ्गिमा भाषासौष्ठवं पदविन्यासञ्चापि अस्मिन् महापुराणे अनेकेषु स्थलेषु दर्शयितुं शक्यते ।

[1] काव्यालङ्कारः ह्य

श्रीमद्भागवते प्रायेण सर्वेषां काव्यतत्त्वानाम् उत्कृष्टस्वरूपं व्यासेन वर्णितम् । तद्यथा – पात्राणां, मनोभावचित्रणं, प्रकृतिचित्रणं, संवादयोजना, च महर्षिणा विदग्धशैल्या समायोजिता ।

श्रीमद्भागवते तत्त्वानां वैशिष्ट्यम

श्रीमद्भागवतमहापुराणे काव्यतत्त्वेषु यत्प्रधानतत्त्वं रसवर्णनं वर्तते । तस्य परिपाकः व्यासेन सर्वत्र अभिव्यक्तः । भागवतस्य टीकाकारैः यथा – मधुसूदन, रूपगोस्वामि, जीवगोस्वामि इत्यादिभिः भक्तिरसस्य स्वातन्त्र्येण सत्ता स्वीकृता । काव्यजगति शृङ्गारहास्यादिनवरसाणामेव परिगणना क्रियते । किन्तु भागवतस्य अध्ययनेन ज्ञायते यत् भक्तिरसनाम्नः दशमो रसः अपि स्वीकर्तव्यः । पण्डितराजगन्नाथेनापि विषयेऽस्मिन् गभीरा चर्चा कृता । उच्यते हि – "भगवदनुरागरूपाभक्तिश्चात्र स्थायिभावः न चासौ शान्तरसान्तर्भवितुमर्हति" । अनुरागस्य वैराग्यविरुद्धत्वात् उच्यते –

भक्तेर्देवादिरतित्वेन भावान्तरर्गततया रसत्वानुपपत्तेः।[1]

तथापि भागवतमहापुराणमनेकरससमन्वितं भक्तिरसप्रधानकाव्यं सर्वैः स्वीक्रियते । अत्र "विभावानुभावव्यभिचारिभावसंयोगाद्रसनिष्पत्तिः"इत्यस्य व्याख्या मतभेदपूर्णा वर्तते । साधारणेन सुहृज्जनेषु वासनारूपेण स्थितस्थायिभावः एव विभावः अनुभावः सञ्चारिभावानां संयोगेन रसरूपमुद्भाव्यते । किन्तु विश्वनाथेन यदुक्तम् –

[1] रसगङ्गाधरः

सञ्चारिणः प्रधानानि देवादिविषया रतिः ।

उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते ॥[१]

अनेन प्रकारेण श्रीमद्भागवते देवादिविषयकरतिः स्थायिभावः विद्यते । अत्र भावस्य प्रधानत अस्ति तथा च उपचारेण एव भावप्रधानमेव रसः कथ्यते । यतोहि भावं विना रसो न विद्यते , तथैव रसं विना न भावः सम्भवति । अनया उक्त्या भक्तिरस्य सिद्धिः भवत्येव । किन्तु काव्येषु शृंङ्गारहासरसानां पुष्टिप्रकरणे भक्तिरसः बाधको विद्यते । अनेन कारणेन भक्तिसदृशरसं यद्यपि रसः स्वीक्रियते तथापि रसभाव एव विद्यते । अत्र भागवतमध्ययनेन सर्वैः अनुभूयते भक्तिरसस्योत्पत्तिः भगवद्प्रेम्णा भवति मनोवृत्तौ च विभावानुभावव्यभिचारिभावसंयोगेन भवति । श्रीमद्भागवते विभावः श्रीकृष्णः, अनुभावः नेत्रविक्षेपादयः, व्यभिचारिभावः निर्वेदादयः सन्ति । अत्र काव्यशास्त्रिणां मते विभावः अपि द्विविधो भवति – आलम्बनरूपः उद्दीपनश्च । आलम्बनभावः श्रीकृष्णः तथा उद्दीपनविभावः ईश्वरीयकार्याणि । काव्यशास्त्रभिः स्वीकृतं यत् देवविषयकरतिः स्थायिभावः । अत एव भक्तेः रसश्च आश्रयः एक एव ।

श्रीमद्भागवते सर्वाधिकानि उदाहरणानि शृंङ्गाररसपरकानि सन्ति । किन्तु श्रीमद्भागवते शृङ्गाररसस्य द्विविधरूपं वर्तते । एकं लौकिकं द्वितीयं अलौकिकं च । लौकिकं विषयासक्तिमूलकमस्ति । अलौकिकं आराध्यं प्रति समर्पणभावनापूर्णं अस्ति । अत्र शृङ्गाररसः अलौकिकदृष्ट्या उद्भाव्यते । अलौकिकशृङ्गारस्य अनेकानि उदाहरणानि यथा कृष्णलीलाचित्रणं, गोपादिभिः सह लीलावर्णनं । ऊषानिरुद्धसंयोगवर्णनं उत्कृष्टोदाहरणं वर्तते ।

---

[1] साहित्यदर्पणे ३/२६०

ध्वन्यालोककारेण गुणीभूतव्यञ्जनान्तर्गते रसभावस्य उद्भावना कथ्यते । अस्योदाहरणं प्रद्युम्नाख्याने प्राप्यते । वियोगशृङ्गाररस्यापि वर्णनं श्रीमद्भागवते प्राप्यते । वस्तुतः विप्रलम्भशृङ्गाररस्य हेतुचतुष्टयं स्वीक्रियते –

१. पूर्वरागजन्यम्

२. मानजन्यम्

३. प्रवासजन्यम्

४.करुणाजन्यञ्च

प्राधान्येन विप्रलम्भस्य उत्पत्तिः शापप्रवासयोः भवति । अस्योत्कृष्टोदाहरणमस्ति । द्वारकायां श्रीकृष्णस्य पत्नीनां वियोगः इत्यादयः । भागवतकारेण अस्य वर्णनं अतीवोन्मादजन्यं मार्मिकं चित्रणं च क्रियते ।

एतादृशाः सर्वे रसाः भागवतकारेण यथावसरेण वर्णिताः सन्ति । अनेनाध्यायेन निःसन्देहेन रसदृष्ट्या श्रीमद्भागवतस्य सर्वाधिकं काव्यमूल्यं वर्तते । अस्मिन् महाप्रबन्धे व्यंग्यरूपेण रसस्य सद्भावः प्रदर्शितः । अलङ्कारशास्त्रिभिः निर्दिष्टानां रसानां समावेशः श्रीमद्भागवते समुपलभ्यते ।

श्रीमद्भागवते गुणदोषतत्वानि

काव्यस्य यानि वैशिष्ट्यानि सन्ति, तत्र गुणदोषपरकान्यपि आवश्यकानि भवन्ति । श्रीमद्भागवते गुणदोषादिकं तत्त्वं कथं कीदृशं च अस्ति ? अस्योल्लेखः क्रियते । नाट्यशास्त्रे –

एत एव विपर्यस्ताः गुणाः काव्येषु कीर्तिताः ।[1]

[1] नाट्यशास्त्रे १७/९५

अत्र भरतमुनिना विपर्यशब्देन अभावः अन्यथाभावः वैपरीत्यम् च इत्यर्थत्रयं क्रियते। अभावशब्देन दोषः भावगुणः एव अर्थं प्रकटयति। ध्वन्याचार्येणापि दोषाभावः एव गुणः स्वीक्रियते। अभिनवगुप्तपादेन अयमेवार्थः स्वीकृतः। अनेन अर्थानुसन्धानेन ज्ञायते यत् गुणं विहाय सर्वाणि तत्वानि भावात्मकानि सन्ति। दण्डिवामनौ गुणानां प्रधानविधायकौ स्तः। काव्यशोभायाः कर्तारो गुणाः। शब्दार्थयोः धर्मः तच्छोभाधायकाः गुणाः भवन्ति। वामनमते अधोलिखिततत्त्वानि –

१. गुणः शब्दार्थयोः धर्मः।

२. काव्यस्य मूलशोभाधायकं तत्त्वं गुणाः।

३. काव्यत्त्वे अनिवार्यरूपेण गुणाः भवितव्याः गुणान् विना काव्यपदं नाभिधीयते।

अत्र दण्डिवामनयोर्मते इदमेव यत् गुणाः शब्दार्थयोः धर्मः। ध्वनिकारेण अभिहितं यत् रसाश्रिताः गुणाः भवन्ति। मम्मटः व्यनक्तिः –

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः॥[1]

अस्य मतस्य विश्लेषेण सूत्रत्रयं प्राप्यते –

१. गुणः रसस्य धर्मः।

२. गुणः नित्यः अचलस्थितिरूपेण काव्यं वर्तते।

३. गुणः रसोत्कर्षकः।

शब्दार्थयोः चमत्कारः गुणस्याधारतत्त्वं भवति।

---

[1] काव्यप्रकाशे ८/६६

श्रीमद्भागवते गुणतत्त्ववैशिष्ट्यम्

मनोवैज्ञानिकदृष्ट्या रसः गुणश्च उभयोः मनःस्थितौ स्थितः । रसः उभावपि आनन्दरूपमनःस्थितिः वर्तते । गुणः चित्तवृत्तीनां कारणमस्ति । गुणसंख्याविषये भिन्न–भिन्नमतं वर्तते किन्तु गुणत्रयस्य स्वीकृतिः अनेकैः आचार्यैः प्रकटिता । श्रीमद्भागवते गुणत्रयाणाम् उत्कृष्टरूपं अनेकेषु स्थलेषु प्राप्यते । माधुर्यगुणस्य कतिपयानि उदाहरणानि – कोमलकान्तपदावलीकारणेन माधुर्यगुणस्य उदाहरणमत्र प्रस्तूयते –

सत्यव्रतं सत्यपरं त्रिसत्यं
सत्यस्य योनिं निहितं च सत्ये ।
सत्यस्य सत्यमृतसत्यनेत्रं
सत्यात्मकं त्वां शरणं प्रपन्नाः ॥[१]

अस्मिन् पद्ये टवर्ग रहितं वर्णनं लघुसमासान्तं सानुस्वारं चास्ति । तथैव –

तमद्भुतं बालकमम्बुजेक्षणं
चतुर्भुजं शङ्खगदार्युदायुधम् ।
श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं
पीताम्बरं सान्द्रपयोदसौभगम् ॥[२]

इत्यत्रापि तान्येव वैशिष्ट्यानि सन्ति । भागवतमहापुराणे प्रचुराणि उदाहरणानि गुणानां प्राप्तानि भवन्ति । ओजगुणस्यापि उदाहरणानि दशमस्कन्धे प्राप्तव्यानि –

[1] श्रीमद्भागवते १०/२/२६
[2] श्रीमद्भागवते १०/३/९

त्रिशूलमुद्यम्य सुदुर्निरिक्षणो

युगान्तसूर्यानलरोचिरुल्बणः ।

ग्रसंस्त्रिलोकीमिव पञ्चभिर्मुखैः

रभ्यद्रवत्ताक्ष्र्यसुतं यथोरगं ॥

आविध्य शूलं तरसा गरुत्मते

निरस्य वक्त्रैर्व्यनदत् स पञ्चभिः ।

स रोदसी सर्वदिशोऽन्तरं महा-

नापुरयन्नण्डकटाहमावृणोत् ॥

तदापतद् वै त्रिशिखं गरुत्मते

हरिः शराभ्यामभिनत्त्रिधौजसा ।

मुखेषु तं चापि शरैरताडयत् तस्मै

गदां सोऽपि रुषा व्यमुञ्चत ॥

तमापतन्तीं गदया गदां मृधे

गदाग्रजो निर्बिभिदे सहस्रधा ।

उद्यम्य बाहूनभिधावतोऽजितः

शिरांसि चक्रेण जहार लीलया ॥[1]

यथोक्तं काव्यशास्त्रिभिः युक्ताः ट-ठ-ड-ढ-णादयः वीररसस्यात्र वर्णनं समस्तपदानां बाहुल्यं टवर्गीयवर्णानां संयोजनं चास्ति । अन्यत्रापि अस्योदाहरणानि व्यासेन वर्णितानि । यथा नृसिंहावतारे, पूतनावधे वकासुरादिप्रसंगे च ।

[1] श्रीमद्भागवते १०/५९/७-१०

श्रीमद्भागवतमहापुराणे यत्र यत्र वैदर्भीशैली सम्प्राप्ता भवति तत्र तत्र प्रसादगुणस्यापि अवस्थितिः वर्तते । काव्यप्रकाशकारेण शुष्केन्धनाग्निवत् इत्यादिप्रसादगुणस्य लक्षणं कृतम् ।

श्रीमद्भागवते अस्य गुणस्य अनेकानि उदाहरणानि सन्ति । यथा दशमस्कन्धे –

श्रुत्वा गुणान् भुवनसुन्दर शृण्वतां ते
निर्विश्य कर्णविवरैर्हरतोऽङ्गतापम् ।
रूपं दृशां दृशिमतामखिलार्थलाभं
त्वय्यच्युताविशति चित्तमत्रपं मे ॥[१]

एतेषु पद्येषु प्रसादगुणः आद्यान्तव्याप्तो वर्तते । वामनोक्तदशगुणानामपि उदाहरणानि भागवते प्राप्यन्ते ।

अनेन प्रकारेण श्रीमद्भागवतस्य गुणयोजना सर्वोत्कृष्टा च वर्तते । यतोहि गुणानां समवायः वर्णशब्देषु चमत्कृतिः उद्भाव्यते । अनेन सह रसयोजनामपि प्रभवति । सम्पूर्णे भागवतमहापुराणे दशगुणानां प्रयोगः सम्प्राप्तः भवति ।

श्रीमद्भागवते दोषतत्त्वनिरूपणम्

दोषास्तस्यापकर्षकाः–

यस्य कस्यापि महाकाव्यस्य यदा काव्यशास्त्रीयदृष्ट्या विचार्यते तत्समये दोषविवेचनस्यापि अपेक्षा विहिता वर्तते । यत्र काव्योत्कर्षः गुणेन भवति तथैव काव्यापकर्षः दोषतत्त्वेन भवति । दोषविषये काव्यप्रकाशकारेण निगदितम् –

[1] श्रीमद्भागवते १०/५२/३७

निरर्थकं पादपूरणमात्रप्रयोजनं चादिपदम् ।[1]

तथैव अग्निपुराणकारेण –

उद्वेगजनको दोषः इति कथितः ।[2]

काव्यशास्त्राध्ययनेन ज्ञायते यत् काव्यं निर्दुष्टत्वं भवेदिति । काव्यात्मकविश्लेषेण ज्ञायते यत् गुणाभावेन दोषोपजायते ।

संस्कृतवाङ्मये नैकानि काव्यानि सन्ति । येषु निर्दुष्टता न विद्यते । किन्तु श्रीमद्भागवते विषयेऽस्मिन् कथनमिदं अतिकाठिन्यं विद्यते । यतोहि काव्यशास्त्रकारैः दोषस्य स्वरूपं द्विविधं कथितम् –

१. शब्दगतदोषः

२. अर्थगतदोषश्च

तात्त्विकदृष्ट्या दोषाणां सम्बन्धः रसापकर्षेण सह एव । अनेन कारणेन श्रीमद्भागवतस्य इदमेव वैशिष्ट्यं यन्नात्र शब्दगतदोषः न चात्र अर्थगतदोषः । अस्य प्रमाणानि प्रस्तूयन्ते –

१. श्रीमद्भागवते शब्दः सुकुमारः स्वरश्च मधुरा वर्तते ।

२. श्रुतिकटुत्वादिदोषः अतिकाठिन्येन यत्र कुत्रापि प्राप्यते ।

३. भागवतं प्रौढं काव्यं श्रेष्ठरचना च विद्यते ।

४.अस्मिन महाकाव्ये रसानां भावानां च विन्यासः कौशल्येन कृतः व्यासेन ।

५. अस्मिन् महापुराणे पौराणिकतत्त्वं दार्शनिकतत्त्वं सृष्टिविद्या, भक्तितत्त्वं काव्यतत्त्वं च समन्वितमस्ति ।

---

[1] काव्यप्रकाशे पृ. १८५

[2] अग्निपुराणे २३७/

तथापि पुनरावृत्तयः अनेकेषां श्लोकानां सन्ति । तथापि रचना वैशिष्ट्ये स्खलनं नास्ति ।

श्रीमद्भागवते अद्यतनानां वैयाकरणानां दृष्ट्या अप्रचलति प्रयोगाणां प्रयोगः प्राप्यते । अनेन कारणेन अत्यल्परूपं दोषः दृश्यते । यथा –

तां बाढमित्युपामन्त्र्य प्रविश्य गजसाह्वयम् ।
स्त्रियश्च स्वपुरं यास्यन् प्रेम्णा राज्ञा निवारितः ॥[१]

अत्र गजसाह्वयं पदं हस्तिनापुरार्थे प्रयोगः कृतः । भागवतकारेणात्र हस्तिशब्दस्य गजग्रहणेन गजसाह्वयं प्रयोगः कृतः । अनेन कारणेन अप्रयुक्तदोषः किञ्चित् दृश्यते । तथैव टवर्गीयसंयुक्तवर्णैः श्रुतिकटुत्वामपि दृश्यते । यथा –

नावधीत् गुरुर्वाक्येन चक्रे विकृतवेषिणः ।
मुण्डाञ्छ्मश्रुधरान् कांश्चिन्मुक्तकेशार्धमुण्डितान् ॥[२]

तथापि श्रीमद्भागवतस्य काव्यस्वरूपं अनल्पमस्ति । यतोहि रसभावयोजनायां गुणयोजनायां अलङ्कारयोजनायां छन्दयोजनायां च महर्षिणः भूषणानि एव सन्ति न च दूषणानि ।

श्रीमद्भागवतं अलङ्कारयोजनावैशिष्ट्यम्

काव्यजगति प्रसिद्धमस्ति –

न कान्तमपि निर्भूषं विभाति वनिताननम् ।[३]

---

[1] श्रीमद्भागवते १/८/४५

[2] श्रीमद्भागवते ९/८/६

[3] काव्यालंकारे १/१३

इत्याधारेण काव्यरत्नस्य सौन्दर्यस्य च अलङ्काराणां योजना आवश्यकी भवति । श्रीमद्भागवते ऋग्वेदाधारीकृत्यैव उपमा यमकादीनां अलङ्काराणां महर्षिणा प्रयोगः कृतः । अलङ्कारयोजनया श्रीमद्भागवते सौन्दर्योत्पादनं, शोभाविधानं, प्राभावोत्पादनं , चमत्कारसंयोजनं , स्पष्टभावावबोधनं विम्बग्रहणादियोजनं, रसोपकरणं, सङ्गीतस्वरोत्पादनं च सर्वोत्कृष्टरूपं उद्भाव्यते ।

व्यासेन शब्दालङ्काराणां अर्थालङ्काराणां प्रयोगः आदावन्ते च कृतः । यथा– अलङ्कारः शब्दार्थसाहित्यस्य उत्कृष्टत्वं उपकारकत्वं च आधायको भवति तथैव महर्षिणा लेखिन्यां वाण्यां वा अलङ्कारेण संयोजिता । विविधानां अलङ्काराणां उदाहरणानि अपि पूर्वमेव निर्दिष्टानि । तथापि अत्र काव्यालोचनदृष्ट्या कथयितुं शक्यते यत् भागवतकारेण पञ्चाशदधिकालङ्काराणां प्रयोगःकृतः ।

श्रीमद्भागवते छन्दवैशिष्ट्यम्

काव्यस्य पद्यस्वरूपे छन्दसां आधाररूपेण आवश्यकं तत्त्वं विद्यते । अस्यापि मौलिकाधारः भावेषु लयेषु च विद्यते । अनादिकालतः नरः छन्दाश्रयी आसीत् । ग्राम्यक्षेत्रेषु ये जनाः अनध्यायिनः आसन् तेऽपि स्वरज्ञानं अन्नजलग्राह्य निमित्ताय छन्दबद्धपद्यानां विविधेषु छन्दसां प्रथमो प्रयोगः प्राप्यते । ततः परं पुराणेष्वपि अस्याः परम्परायाः अविरलधारा प्रचलितासीत् । काव्यजगति क्षेमेन्द्रस्य सुवृत्ततिलकं अन्येषामपि वृत्तविदुषां ग्रन्थाः प्रसिद्धाः सन्ति ।

छन्दवैशिष्ट्यम्

श्रीमद्भागवतमहापुराणे प्राधान्येन अनुष्टुप्छन्दसः शिखरिणी –स्वागता–मालिनी–पुष्पिताग्रा–वसन्ततिलका–इन्द्रवज्रा–उपेन्द्रवज्रा–मन्दाक्रान्तादीनां छन्दो योजना प्रसङ्गानुकूलेन महर्षिणा कृता इति ।

श्रीमद्भागवते अनुष्टुपतिरिक्तान् प्रायेण पञ्चाशदधिकान् छन्दसः प्रयोगः कृतः । यत्र कुत्रापि वैदिकं छन्दसामपि दर्शनं भवति । श्रीमद्भागवते वैशिष्ट्यमिदमस्ति यत् छन्दसां प्रयोगः शास्त्राधारितनियमेन सन्दर्भानुसारेण च दृश्यते । यथा कथाविवेचने अनुष्टुप्छन्दसा, स्तुतिषु इन्द्रवज्रादीनां प्रयोगः प्राप्यते । एतदतिरिक्तं भागवते गायत्री, त्रिष्टुप्, जगतिः, पङ्क्तिः, बृहतिः इत्यादिछन्दसां वैदिकनियमेन स्वीकृतः ।

भागवते छन्दसामुत्पत्तिः वर्णनमिति प्राप्यते । तृतीयस्कन्धस्य द्वादशोऽध्याये वर्ण्यते यत् –

तस्योष्णिगासील्लोमभ्यो गायत्री च त्वचो विभोः ।
त्रिष्टुम्मांसात्स्नुतोऽनुष्टुब्जगत्यस्थ्नः प्रजायतेः ॥
मज्जायाः पङ्क्तिरुत्पन्ना बृहती प्राणतोऽभवत् ।
स्पर्शस्तस्याभवज्जीवः स्वरो देह उदाहृतः ॥[१]

एतदनुसारेणैव वर्णानामाधारेणैव च उक्तदृष्ट्या छन्दसां प्रयोगः व्यासेन कृतः । अनेन कारणेन श्रीमद्भागवतमुत्कृष्टं महाकाव्यं कथ्यते ।

## काव्यतत्त्वानामुपयोगिता

श्रीमद्भागवतं भगवतः कृष्णस्य सर्वोत्कृष्टं चरितमहाकाव्यं वर्तते । भागवतशब्दः योगरूढः विद्यते न तु यौगिकः । साक्षात्भगवतः प्रतिपादनकारणाद् एव भागवतं कथ्यते । अस्मिन् महाकाव्ये कलासाहित्यदर्शनविज्ञानादीनां वर्णनं प्राप्यते, तथापि आनन्दस्वरूपश्रीहरेः लीलाचरितमपि स्वीक्रियते । अनया धारणया

[1]श्रीमद्भागवते ३/१२/४५–४६

श्रीमद्भागवतं भक्तिशास्त्रं स्वीक्रियते । यथा वाल्मीकिरामायणं महाभारतं ज्ञानविज्ञानस्य सन्दर्भग्रन्थाः तथैव श्रीमद्भागवते वर्णितानां भावात्मकसंबद्धानां काव्यदृष्ट्या उपयोगिता दृश्यते । अत्र लोकनीतिः, धर्मनीतिः, राजनीतिश्च परिष्कृतस्वरूपे विद्यते ।

काव्यतत्त्वानां अभिव्यञ्जनाश्रोतं श्रीमद्भागवतं इति अनेकैः टीकाकारैः स्वीकृतम् । साहित्यजगति श्रीमद्भागवतस्य योगदानं अविस्मरणीयं वर्तते । काव्यरचनायाः प्रेरणा भागवदादेव प्राप्यते । गद्यकाव्यस्य संरचना भागवतं दृष्ट्वा एव क्रियते । विविधानां काव्यानां अनुभूतिः परिपुष्टा भवति । अस्य महापुराणस्य कथानकं स्वीकृत्य तद्वर्णितगीतानां हृदयहारिणी अभिव्यक्तिः श्लाघनीया वर्तते । यदि श्रद्धया सेवते भागवतं तदा ईश्वरस्य ज्ञानभक्तेः स्वरूपं वैराग्यश्च उद्भावना प्राप्यते । अनेकैः चिन्तकैः स्वीक्रियते यत् भागवतग्रन्थरत्नं धर्मरसोद्भावकं वर्तते । अत्र काव्यानां काव्यतत्त्वानां समावेशः एवं प्रकारेण कृतः महर्षिव्यासेन । यत्तदाधारीकृत्यैव काव्यरचनां कर्तुं शक्यते –

राजन्ते तावदन्यानि पुराणानि शतां गये
यावद्भागवतं नैव श्रुयते अमृतसागरं ।
सर्ववेदान्तसारं हि श्रीमद्भागवतमिष्यते
तद्रसा तृप्तस्य नान्यत् स्यात् इतिः क्वचित् ॥

श्रीकृष्णचैतन्यः कथयति यत् श्रीमद्भागवतं पुराणं एतादृशः ग्रन्थः वर्तते । ग्रन्थेऽस्मिन् प्रेममार्गस्य कवित्वपूर्णा शैली आलङ्कारिकं विस्तृतं वर्णनं, प्रकृतिवर्णनं, काव्यात्मकस्वरूपेण च दृश्यते । अस्य लोकप्रियग्रन्थस्य अनेकाः टीकाः संस्कृतभाषायां सन्त्येव अपिच बाङ्गलाभाषायामपि चत्वारिंशदधिकाः

अनुवादाः प्रसिद्धाः सन्ति । इदं भागवतं स्वीकृत्य अनेकैः कविभिः स्वस्वकाव्येषु काव्यतत्त्वानां सत्यस्वरूपं स्वीकृतम् । विविधैः साम्प्रदायिकाचार्यैरपि भागवतस्य समस्तशास्त्राणां रहस्यं वैराग्यस्य आचरणस्य नीतेः इत्यादयः उपजीव्यग्रन्थः वर्तते एव, एतैः सह सप्तमी साहित्यविद्याधारेण काव्यसृष्टेः प्रजापतिरपि वर्तते । अत्र सौन्दर्यसृष्टेः चरमोत्कर्षं स्वरूपं महनीयकाव्यकलायाः औदात्यञ्च कथ्यते । ग्रन्थेऽस्मिन् महाकाव्योचितं, स्वाभाविकं, सौन्दर्यं, गीतकाव्योचितं माधुर्यं , स्तोत्रकाव्योचिता तन्मयता, कथाकाव्योचितरोचकता च समाहिताः सन्ति । अस्य ग्रन्थस्यैव उपजीव्यं स्वीकृत्य शब्दालङ्काराणां परम्परया सर्वैः कविभिः अन्वान्विष्यते ।

अनेन ज्ञायते यत् अस्य ग्रन्थस्य काव्यशास्त्रीयदृष्ट्या काव्यतत्त्वानामुपयोगिता उद्भाव्यते ।

-----------------